P15,C:4,c1,1
H5.2

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

P15, C:4x1,1 00320
H5.2 मं.धा.१६
अमरसिंह
अमरधारा / संपुरा
S/5 १४५२२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

P15,C:4x1,1 0030
H5.2

कृपया यह ग्रन्थ नीचे निर्देशित तिथि के पूर्व अथवा उक्त तिथि तक वापस कर दें। विलम्ब से लौटाने पर प्रतिदिन दस पैसे विलम्ब शुल्क देना होगा।

१५५२२२.		

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लक्ष्मीग्रन्थमालायाश्चतुर्थं रत्नम् ।

अमरसिंहप्रणीतः—

अमरकोषः

द्वितीयकाण्डस्य [illegible]

वर्गान्तो भागः ।

पं० रामतेजपाण्डेयकृतटिप्पण्या विभूषितः

तेनैव संशोधितश्च ।

प्रकाशकः—

पं० लक्ष्मीनारायण मिश्र

लक्ष्मी-संस्कृत-पुस्तकालय,

कचौड़ीगली, बनारस सिटी ।

संवत् १९९६

प्रथमावृत्तिः

[illegible] वेद वेदांग विद्यालय

आगत क्रमांक ..३५.....

दिनांक.....(सूर्यांक)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

P15.C.Jr.L.1
H5.2

मुमुक्षु भवन वेद वेदाङ्ग पुस्तकालय
वा. ज. ...
आगत क्रमांक..... 0030 .....
दिनांक..... 15/5/82 .....

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२४५

श्रीमंगलमूर्तये नमः ।

अमरकोषे—

द्वितीयं काण्डम् ।

भूमिवर्गः ।

[1]वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
नृब्रह्मक्षत्रविट्शूद्रैः सांगोपांगैरिहोदिताः ॥ १ ॥
[2]भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥ २ ॥
सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही ॥ ३ ॥
([3]विपुला गहरी धात्री गौरिला कुम्भिनी क्षमा ।
भूतधात्री रत्नगर्भा जगती सागराम्बरा ॥ १ ॥)
[4]मृन्मृत्तिका प्रशस्ता तु [5]मृत्सा मृत्स्ना च मृत्तिका ।
[6]उर्वरा सर्वसस्याढ्या स्यादूषः [7]क्षारमृत्तिका ॥ ४ ॥

---

१ अस्मिन् काण्डे साङ्गोपाङ्गाः पृथिव्यादयो दश वर्गा उक्ताः । २ सप्तविंशतिर्भूमेः । ३ विपुलेत्याद्येकादशापि भूमेः । ४ द्वे मृत्तिकायाः—(मिट्टी) । ५ द्वे प्रशस्तमृदः—(अच्छी और साफ मिट्टी) । ६ एकं सर्वसस्याढ्यमृत्तिकायाः—(उपजाऊ मिट्टी)।७ द्वे क्षारमृत्तिकायाः—(खारी मिट्टी)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]ऊषवानूषरो द्वावप्यन्यलिंगौ स्थलं स्थली ।
समानौ [2]मरुधन्वानौ द्वे [3]खिलाप्रहते समे ॥ ५ ॥
त्रिष्वथो [4]जगती लोको विष्टपं भुवनं जगत् ।
लोकोऽयं [5]भारतं वर्षं शरावत्यास्तु योऽवधेः ॥ ६ ॥
देशः प्राग्दक्षिणः [6]प्राच्य [7]उदीच्यः पश्चिमोत्तरः ।
[8]प्रत्यन्तो म्लेच्छदेशः [9]स्यान्मध्यदेशस्तु मध्यमः ॥ ७ ॥
[10]आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः ।
[11]नीवृज्जनपदो [12]देशविषयौ तूपवर्तनम् ॥ ८ ॥
[13]त्रिष्वागोष्ठानडमाये [14]नड्वान्नड्वल इत्यपि ।
[15]कुमुद्वान् कुमुदमाये [16]वेतस्वान् बहुवेतसे ॥ ९ ॥

---

१ द्वयं क्षारमृद्विशिष्टदेशस्य । २ द्वे निर्जलप्रदेशस्य । ३ द्वे हलाद्यकृष्टक्षेत्रादेः—(बिना जोता खेत) । ४ पञ्च भूतलस्य—(जगत्) । ५ जम्बुद्वीपवर्त्ती दृश्यमानो लोकः—(भारतवर्ष = हिन्दुस्तान) । उक्तं च—

'उत्तरस्य समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥' इति ।

६ एकं शरावत्या नद्या अवधेः प्राक्सहितदक्षिणदेशस्य । ७ एकं शरावत्या अवधेः पश्चिमसहितोत्तरदेशस्य । ८ द्वे शिष्टाचाररहितम्लेच्छादिदेशस्य । ९ द्वे मध्यदेशस्य । १० विन्ध्यहिमाचलयोरन्तरस्य । ११ द्वे राष्ट्रस्य—(मुल्क) । १२ त्रीणि देशमात्रस्य । १३ गोष्ठशब्दमभिव्याप्य वक्ष्यमाणास्त्रिषु लिङ्गेष्वित्यर्थः । १४ द्वे नड्वलदेशस्य (विशेष तौर से नरकट उत्पत्ति का देश) । १५ एकं कुमुद्वहुलस्य । १६ एकं बहुवेतसस्य—(बहुत बेत) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]शाद्वलः शादहरिते सजम्बाले तु [2]पंकिलः ।
[3]जलप्रायमनूपं स्यात्पुंसि [4]कच्छस्तथाविधः ॥ १० ॥
स्त्री [5]शर्करा शर्करिलः शार्करः [6]शर्करावति ।
[7]देश एवादिमावेवमुन्नेयाः सिकतावति ॥ ११ ॥
देशो नद्यम्बुवृष्ट्यम्बु संपन्नव्रीहिपालितः ।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥ १२ ॥
सुराज्ञि देशे [8]राजन्वान् स्यात्ततोऽन्यत्र [9]राजवान् ।
[10]गोष्ठं गोस्थानकं तत्तु [11]गौष्ठीनं भूतपूर्वकम् ॥ १३ ॥
पर्यन्तभूः परिसरः [12]सेतुरालौ स्त्रियां पुमान् ।
[13]वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम् ॥ १४ ॥
[14]अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥ १५ ॥
[15]अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि ।
[16]व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ॥१६॥

---

१ एकं बालतृण(हरी-हरी घास)युक्तदेशस्य । २ एकं सकर्दम(कीचड़युक्त)देशस्य । ३ द्वे जलबहुल(तराई)देशस्य । ४ एकं नद्याद्युपान्त(कछार)देशस्य । ५ द्वे बालुका(रेत)युक्तदेशस्य । ६ द्वे सिकता(बालू)युक्तदेशस्य । ७ नद्यम्बुभिर्वृष्ट्यम्बुभिश्च । सम्पन्नव्रीहिभिः पालितदेशस्यैकम् । ८ एकं धर्मशीलो राजा यत्र तस्य । ९ एकं राजामात्रोक्तस्य । १० द्वे गवस्थित (गोशाला) स्थानस्य । ११ एकं पूर्वं यत्र गाव आसन् तत्स्थानस्य । १२ द्वे पुल इति ख्यातस्य । १३ त्रीणि वल्मीकस्य-(बांबी) । १४ द्वादश मार्गस्य । १५ त्रयं शोभनमार्गस्य । १६ पञ्च दुर्मार्गस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]अपन्यास्त्वपथं तुल्ये [2]शृंगाटकचतुष्पथे ।
[3]प्रान्तरं दूरशून्योऽध्वा [4]कान्तारं वर्त्म दुर्गमम् ॥ १७ ॥
[5]गव्यूतिः स्त्री क्रोशयुगं [6]नल्वः किष्कुचतुःशतम् ।
[7]घण्टापथः संसरणं [8]तत्पुरस्योपनिष्करम् ॥ १८ ॥
([9]द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ।
दिक्स्पृथिव्यौ रुजा तु रुमा स्याल्लवणाकरः ॥ १ ॥)

इति भूमिवर्गः ॥ १ ॥

—०—

अथ पुरवर्गः ।

[10] पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम् ॥ १ ॥
तच्छाखा नगरं [11]वेशो वेश्याजनसमाश्रयः ।
[12]आपणस्तु निषद्यायां [13]विपणिः पण्यवीथिका ॥ २ ॥
[14]रथ्या प्रतोली विशिखा [15]स्याच्चयो वप्रमस्त्रियाम् ।

---

१ द्वे अमार्गस्य । २ द्वे 'चौमुहानी' इति ख्यातस्य । ३ एकं छाया-जलादिवर्जितदूरस्थमार्गस्य । ४ एकं घोरकण्टकाद्युपद्रवयुक्तमार्गस्य । ५ एकं क्रोशयुगस्य–(दो कोस) । ६ एकं चतुःशतहस्तपरिमितभूमेः । ७ द्वे राजमार्गस्य । ८ एकं नगरसंसरणमार्गस्य । ९ पञ्च द्यावाभूम्योः । १० सप्तकं नगरस्य । ११ द्वे वेश्यानिवासस्य । १२ द्वे क्रेयवस्तुशालायाः–(मण्डी) । १३ द्वे क्रेयवस्तुशालापङ्क्तेः--(दुकान) १४ त्रीणि ग्रामाभ्यन्तरमार्गस्य । १५ द्वे परिखावृतमृत्तिकाकूटस्य--(खाईं से निकली मिट्टी का ढेर) ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]प्राकारो वरणः सालः [2]प्राचीनं प्रान्ततो वृतिः ॥ ३ ॥
[3]भित्तिः स्त्री कुड्य[4]मेडूकं यदन्तर्न्यस्तकीकसम् ।
[5]गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥ ४ ॥
निशान्तपस्त्यसदनं भवनाऽऽगारमन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयाऽऽलयाः ॥ ५ ॥
[6]वासः कुटी द्वयोः शाला सभा [7]संजवनं त्विदम् ।
चतुःशालं मुनीनां तु [8]पर्णशालोटजोऽस्त्रियाम् ॥ ६ ॥
[9]चैत्यमायतनं तुल्ये [10]वाजिशाला तु मन्दुरा ।
[11]आवेशनं शिल्पिशाला [12]प्रपा पानीयशालिका ॥ ७ ॥
[13]मठश्छात्रादिनिलयो [14]गञ्जा तु मदिरागृहम् ।
[15]गर्भागारं [16]वासगृहमरिष्टं सूतिकागृहम् ॥ ८ ॥
([17]कुट्टिमोऽस्त्री निबद्धा [18]भूश्चन्द्रशाला शिरोगृहम् ।)

---

१ त्रीणि यष्टिकाकाष्ठकादिवेष्टितस्य–(घेरा = चहारदीवारी) २ एकं नगरादिप्रान्तभागकृतवेष्टनस्य । ३ द्वे भित्तेः–(दीवार) । ४ एकमन्तर्न्यस्तकठिनद्रव्यभित्तेः । ५ षोडश गृहस्य । ६ चत्वारि सभागृहस्य । ७ द्वे 'चौक' इति प्रसिद्धस्य । ८ द्वे मुनिगृहस्य । ९ द्वे यज्ञायतनभेदस्य । १० द्वे अश्वशालायाः । ११ द्वे शिल्पि (कारीगर) शालायाः । १२ पानीयशालिकायाः–(पौसरा) । १३ एकं शिष्यादिनिवासस्य–(मठ) । १४ द्वयं मद्यपानगृहस्य । १५ द्वे गृहमध्यभागस्य । १६ द्वे प्रसवस्थानस्य (सौरीघर) । १७ एकं 'पक्का आँगन' इति ख्यातस्य । १८ द्वे 'चौपाल' इति ख्यातस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]वातायनं गवाक्षोऽथ [2]मण्डपोऽस्त्री जनाश्रयः ।
[3]हर्म्यादिधनिनां वासः [4]प्रासादो देवभूभुजाम् ॥ ९ ॥
[5]सौधोऽस्त्री राजसदन [6]मुपकार्योपकारिका ।
[7]स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च ॥ १० ॥
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ।
[8]स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् ॥ ११ ॥
शुद्धान्तश्चावरोधश्च [9]स्यादट्टः क्षौममस्त्रियाम् ।
[10]प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ॥ १२ ॥
[11]गृहावग्रहणी [12]देहल्यङ्गणं चत्वराजिरे ।
अधस्ताद्दारुणि [13]शिला [14]नासा दारूपरिस्थितम् ॥ १३ ॥
[15]प्रच्छन्नमन्तर्द्वारं [16]स्यात्पक्षद्वारं तु पक्षकम् ।
[17]वलीकनीध्रे पटलप्रान्तेऽथ [18]पटलं छदिः ॥ १४ ॥
[19]गोपानसी तु वलभीच्छादने वक्रदारुणि ।

१ द्वे गवाक्षस्य–(झरोखा) । २ द्वे मण्डपस्य । ३ एकं धनवतां गृहस्य । ४ एकं देवानां राज्ञां च गृहस्य । ५ चत्वारि राजगृहस्य । ६ एते देवानां राज्ञां च गृहभेदाः । ७ द्वे राजगृहसामान्यस्य । ८ चत्वारि राजस्त्रीगृहस्य—(रनिवास) । ९ द्वे हर्म्याद्युपरिभागस्य–(अटारी) । १० त्रीणि द्वारप्रकोष्ठाद्बहिश्चतुष्कस्य । ११ त्रीणि 'बरोठा' इति ख्यातस्य । १२ द्वे उदुम्बरस्य (देहली) । १३ त्रीणि अंगणस्य । १४ एकं द्वारस्तस्तम्भाधःस्थितकाष्ठस्य–(चौखट) । १५ एकं द्वारस्तम्भोपरिस्थितकाष्ठस्य । १६ द्वे पार्श्वद्वारस्य–(पखवाही) १७ द्वे पटल (पाटन) प्रान्ते गृहाच्छादनस्य । १८ द्वे छादनस्य–(छप्पर) । १९ द्वे पटलाधरभूतवक्रकाष्ठस्य–(छज्जा) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]कपोतपालिकायां तु विटंकं पुन्नपुंसकम् ॥ १५ ॥
स्त्री [2]द्वाद्वारं प्रतीहारः स्या[3]द्वितर्दिस्तु वेदिका ।
[4]तोरणोऽस्त्री बहिर्द्वारं [5]पुरद्वारं तु गोपुरम् ॥ १६ ॥
[6]कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ।
[7]कपाटमररं तुल्ये तद्विष्कम्भोऽर्गलं न ना ॥ १७ ॥
[8]आरोहणं स्यात्सोपानं [9]निश्रेणिस्त्वधिरोहणी ।
[10]संमार्जनी शोधनी [11]स्यात्संकरोऽवकरस्तथा ॥ १८ ॥
क्षिप्ते [12]मुखं निःसरणं [13]सन्निवेशो निकर्षणम् ।
समौ [14]संवसथग्रामौ [15]वेश्मभूर्वास्तुरस्त्रियाम् ॥ १९ ॥
ग्रामान्त [16]उपशल्यं [17]स्यात्सीमसीमे स्त्रियामुभे ।
[18]घोष आभीरपल्ली [19]स्यात्पक्कणः शबरालयः ॥ २० ॥

इति पुरवर्गः ॥ २ ॥

---

१ द्वे काष्ठादिरचितपक्षिगणनिवासगृहस्य-(दरबा) । २ त्रीणि द्वारस्य। ३ द्वे वेद्याः । ४ द्वे द्वारबाह्य (फाटक) भागस्य । ५ द्वे नगरद्वारस्य । ६एकं पूर्द्वारि सुखावतरणार्थं कृतमृत्कूटस्य-(मिट्टी की सीढ़ी) । ७ एकं 'बेंवड़ा' इति ख्यातस्य । ८ द्वे सोपानस्य । ९ द्वे निश्रेण्याः-(काठ की सीढ़ी) । १० द्वे 'बढ़नी' इति ख्यातस्य-(झाड़ू) । ११ द्वे 'कूड़ा' इति ख्यातस्य । १२ गृहादेर्मुखभूतद्वारप्रदेशस्य । १३ द्वे समीचीनवास-स्थानस्य । १४ द्वे ग्रामस्य । १५ द्वे गृहरचनावच्छिन्न(घर बनाने लायक) भूमेः । १६ एकं ग्रामसमीपभागस्य-(पड़ोस) । १७ एकं ग्रामा-न्तस्य । १८ द्वे गोपालग्रामस्य-(अहिराना) । १९ द्वे भिल्लग्रामस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ शैलवर्गः ।

[1]महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ १ ॥
[2]लोकालोकश्चक्रवाल[3]स्त्रिकूटस्त्रिककुत्समौ ।
[4]अस्तस्तु चरमः क्ष्माभृदुदयः [5]पूर्वपर्वतः ॥ २ ॥
[6]हिमवान्निषधो विन्ध्यो माल्यवान् पारियात्रकः ॥
गन्धमादनमन्ये च हेमकूटादयो नगाः ॥ ३ ॥
[7]पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।
[8]कूटोऽस्त्री शिखरं शृंगं [9]प्रपातस्त्वतटो भृगुः ॥ ४ ॥
[10]कटकोऽस्त्री नितम्बोऽद्रेः [11]स्नुः प्रस्थः सानुरस्त्रियाम् ।
[12]उत्सः प्रस्रवणं [13]वारिप्रवाहो निर्झरो झरः ॥ ५ ॥
[14]दरी तु कन्दरो वा स्त्री [15]देवखातबिले गुहा ।
गह्वरं [16]गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ॥ ६ ॥
([17]दन्तकास्तु बहिस्तिर्यक्प्रदेशान्निर्गता गिरेः ॥)

---

१ त्रयोदश पर्वतस्य । २ द्वे सप्तद्वीपवर्तिभूमेः–(भूमण्डल) । ३ द्वे त्रिकूटपर्वतस्य । ४ द्वे अस्ताचलस्य । ५ द्वे उदयाचलस्य । ६ एते सप्त पर्वतविशेषाः । ७ सप्त पाषाणस्य–(पत्थर) । ८ त्रयं पर्वतशिखरस्य । ९ त्रयं पर्वतात्पतनस्थानस्य । १० एकं पर्वतमध्यभागस्य । ११ त्रीणि पर्वतसमभूभागस्य । १२ द्वे जलस्य बहुलीभवनस्थानस्य । १३ त्रीणि निर्झरस्य–(झरना) । १४ द्वे कन्दरस्य–(गुफा) । १५ त्रीणि अकृत्रिमबिलस्य । १६ एकं गिरिच्युतस्थूलपाषाणानाम्–(बड़ी चट्टान) । १७ एकं गिरितिर्यक्प्रदेशनिर्गतशूलाकारपाषाणानाम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]खनिः स्त्रियामाकरः [2]स्यात्पादाः प्रत्यन्तपर्वताः ।
[3]उपत्यकाद्रेरासन्नाभूमिरूर्ध्वमधित्यका[4] ॥ ७ ॥
[5]धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः ।
(सुवर्णरौप्यताम्राणि हरितालं मनःशिला ।
गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुला ।
[6]दरधगोऽभ्रक इत्याद्या धातवो गिरिसम्भवाः ।)
निकुञ्जः कुञ्जौ वा क्लीबे लतादिपिहितोदरे ॥ ८ ॥

इति शैलवर्गः ॥ ३ ॥

अथ वनौषधिवर्गः ।

[7]अटव्यरण्यं विपिनं गहनं काननं वनम् ॥
[8]महारण्यमरण्यानी [9]गृहारामास्तु निष्कुटाः ॥ १ ॥
[10]आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ॥
अमात्यगणिकागेहोपवने [11]वृक्षवाटिका ॥ २ ॥
पुंसानाक्रीड [12]उद्यानं राज्ञः साधारणं वनम् ॥
स्यादेतदेव [13]प्रमदवनमन्तःपुरोचितम् ॥ ३ ॥

१ द्वे आरस्य–(खान) । २ द्वे पर्वतसमीपस्याल्पपर्वतानाम् (पहाड़ी) । ३ एकमद्रेरधः सन्निहितभूमेः । ४ एकमद्रेरूर्ध्वभूमेः । ५ गैरिकस्यैकम्–(गेरू) । ६ द्वे लताच्छादितस्थानस्य । ७ पट्वनस्य । ८ द्वे महतो वनस्य । ९ द्वे गृहसमीपकृत्रिमवनस्य । १० द्वे कृत्रिमवनस्य । ११ एकममात्यानां च गृहोपवनस्य । १२ द्वे राज्ञः साधारणवनस्य । १३ एकं राज्ञः क्रीडोचितवनस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]वीथ्यालिरावलिः [2]पङ्क्तिः श्रेणी [2]लेखास्तु राजयः ।
[3]वन्या वनसमूहे [4]स्यादंकुरोऽभिनवोद्भिदि ॥ ४ ॥
[5]वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः शालः पलाशी द्रुमागमाः ॥ ५ ॥
[6]वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः[7] ॥
[8]ओषध्यः फलपाकान्ताः [9]स्यादवन्ध्यः फलेग्रहिः ॥ ६ ॥
वन्ध्योऽफलोऽवकेशी च फलवान् फलिनः फली ।
[10]प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥
फुल्लाश्चैते विकसिते [11]स्युरवन्ध्यादयस्त्रिषु ।
[12]स्थाणुर्वा ना ध्रुवः शंकुः [13]ह्रस्वशाखाशिफः [14]क्षुपः ॥८॥
अप्रकाण्डे [15]स्तम्भगुल्मौ [16]वल्ली तु व्रततिर्लता ।
[17]लता प्रतानिनी वीरुद्गुल्मिन्युलप इत्यपि ॥ ९ ॥
नगाद्यारोप [18]उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ।
अस्त्री [19]प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः

१ पञ्च वनस्य । २ द्वे लेखानाम्—(झुण्ड) । ३ एकं वनसमूहस्य । ४ अंकुरस्य फलोपलक्षितस्य । ५ त्रयोदश वृक्षाणाम् । ६ पुष्पानन्तरफलग्रहिवृक्षाणां वानस्पत्यः । ७ अन्यत्र वनस्पत्यः । ८ एकं फलपाकोऽन्तो यासां तासाम् । ९ द्वे फलाधारवृन्तस्य । १० फलेग्राहिवनस्पतेः । ११ त्रीणि फलितवृक्षस्य । १२ अष्ट पुष्पितवृक्षस्य । १३ शाखापत्रादिरहित (ठूँठ) वृक्षस्य । १४ एकं ह्रस्वशाखायुक्तवृक्षस्य—(पौधा) १५ त्रीणि काण्डरहितस्य । १६ त्रयं लतायाः—(लतर) । १७ पत्रशाखादिसहितलतायाः । १८ त्रयं वृक्षादीनामुच्चत्वस्य । १९ द्वे वृक्षस्य मूलमारभ्य शाखापर्यन्तभागस्य—(पेड़ का तना) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]समे शाखालते [2]स्कन्धशाखा शाले [3]शिफाजटे।
[4]शाखाशिफावरोहः स्यान्मूलाच्चाग्रंगता लता ॥ ११ ॥
शिरोऽग्रं [5]शिखरं वा ना [6]मूलं बुध्नोऽङ्घ्रिनामकः।
[7]सारो मज्जा नरि [8]त्वक्स्त्री वल्कं वल्कलमस्त्रियाम् ॥१२॥
[9]काष्ठं दार्विन्धनं [10]त्वेध इध्ममेधः समित्स्त्रियाम्।
[11]निष्कुहः कोटरं वा ना [12]बल्लूर्मञ्जरिःस्त्रियौ ॥१३॥
[13]पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्
[14] पल्लवोऽस्त्री किसलयं विस्तारो [15]विटपोऽस्त्रियाम् १४
वृक्षादीनां फलं [16]सस्यं [17]वृन्ते प्रसववन्धनम्।
आमे फले [18]शलाटुः स्याच्छुष्के [19]वानमुभे त्रिषु ॥१५॥
[20]क्षारको जालकं क्लीबे [21]कलिका कोरकः पुमान्।
[22]स्याद्गुच्छकस्तु स्तवकः [23]कुड्मलो मुकुलोऽस्त्रियाम् १६
[24]स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ॥

---

१ द्वे शाखायाः-(डाली)। २ द्वे प्रधानशाखायाः। ३ द्वे वृक्षादेर्मूलस्य-(जड़)। ४ एकं मूलादग्रङ्गताथाः लतायाः-(बड़ आदि की जटा)। ५ एकं शिरसाग्रस्य-(चोटी)। ६ त्रीणि वृक्षादेर्मूलस्य। ७ द्वयं वृक्षाभ्यन्तरस्य--(सारभाग)। ८ त्रयं त्वचः-(छाल)। ९ द्वे काष्ठमात्रस्य। १० पञ्चकं शुष्कतृणकाष्ठादेः-(ईंधन)। ११ द्वे वृक्षगतविवरस्य-(खोड़र)। १२ द्वे मञ्जर्याः। १३ षष्ठकं पत्रस्य। १४ द्वे पत्रादियुक्तशाखापर्वणाम्। १५ एकं विस्तरस्य-(घेरा) १६ एकं फलस्य। १७ एकं 'ठण्डी'त्यस्य। १८ एकमाम (कच्चा) फलस्य। १९ एकं शुष्कफलस्य। २० द्वे नूतनकलिकायाः-(नवीन कली)। २१ द्वे अस्फुटितपुष्पस्य। २२ द्वे कलिकाद्याकीर्णस्य। २३ द्वे ईषद्विकसितकर्णिकायाः। २४ पञ्च पुष्पस्य।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]मकरन्दः पुष्परसः [2]परागः सुमनोरजः ॥ १७ ॥
द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम् ।
[3]आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फले ॥ १८ ॥
बार्हतं च फले जम्ब्वा [4]जम्बूः स्त्री जम्बु जाम्बवम् ।
पुष्पे [5]जातिप्रभृतयः स्वलिङ्गा व्रीहयः फले ॥ १९ ॥
[6]विदार्याद्यास्तु मूलेऽपि पुष्पे क्लीबेऽपि पाटला ।
[7]बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ॥ २० ॥
अश्वत्थेऽथ [8]कपित्थे स्युर्दधित्थग्राहिमन्मथाः ।
[9]तस्मिन् दधिफलः पुष्पफलदन्तशठावपि ॥ २१ ॥
उदुम्बरो जन्तुफलो यज्ञांगो हेमदुग्धकः ।
[10]कोविदारे चमरिकः कुद्दालो युगपत्रकः ॥ २२ ॥
[11]सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।
[12]आरग्वधे राजवृक्षसम्पाकचतुरंगुलाः ॥ २३ ॥
आरेवतव्याधिघातकृतमालसुवर्णकाः ।
[13]स्युर्जम्बीरे दन्तशठजम्भजम्भीरजंभलाः ॥ २४ ॥

---

१ द्वे पुष्परसस्य । २ द्वे पुष्परेणोः । ३ एकैकं तत्तद्वृक्षफलस्य । ४ त्रीणि जम्ब्वाः (जामुन) फलस्य । ५ जातियूथिकादयः (जूही) रूपे स्वलिङ्गाः । ६ एता मूलेपि स्वलिङ्गाः । पाटला पुष्पे वर्तमाना क्लीबे । ७ पञ्चकमश्वत्थस्य–(पीपल) । ८ सप्तकं 'कैथ' इति ख्यातस्य । ९ चत्वारि उदुम्बरस्य–(गुलर) । १० चत्वारि 'कचनार' इति ख्यातस्य । ११ चत्वारि 'छतिवन' इति ख्यातस्य । १२ अष्टौ 'धन बहेड़ा' इति ख्यातस्य । १३ पंच जंबीरस्य–(जँभीरी नीबू) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]वरणो वरुणः सेतुस्तिक्तशाकः कुमारकः ।
[2]पुंनागे पुरुषस्तुंगः केसरो देववल्लभः ॥ २५ ॥
[3]पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।
[4]तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ २६ ॥
वञ्जुलश्चित्रकृच्चाथ [5]द्वौ पीतनकपीतनौ ।
आम्रातके [6]मधूके तु गुडपुष्पमधुद्रुमौ ॥ २७ ॥
वानप्रस्थमधुष्ठीलौ जलजेऽत्र [7]मधूलकः ।
[8]पीलौ गुडफलः स्रंसी तस्मिंस्तु गिरिसंभवे ॥ २८ ॥
अक्षोटकन्दरालौ [9]द्वावंकोटे तु निकोचकः ।
[10]पलाशे किंशुकः पर्णो [11]वातपोतोऽथ वेतसे ॥ २९ ॥
रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः ।
द्वौ [12]परिव्याधविदुलौ नादेयी चाम्बुवेतसे ॥ ३० ॥
[13]शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः ।

---

१ पञ्च (वरुना) इति ख्यातस्य । २ पञ्च केशरवृक्षस्य । ३ चत्वारि निम्बतरोः–(बकायन) । ४ सप्तकं 'तिनिस' इति ख्यातस्य । ५ त्रयं 'अंबाड़ा' इति ख्यातस्य । ६ पञ्चकं 'महुवा' इति ख्यातस्य । ७ एकं जलजे मधूके–(जलमहुवा) । ८ त्रीणि 'अखरोट' इति प्रसिद्धस्य । ९ त्रीणि 'ढेरा' इति ख्यातस्य । १० चत्वारि पलाशस्य ११ सप्तकं वेतसस्य । १२ चत्वारि जलवेतसस्य । १३ पञ्चकं 'सहिजन' इति ख्यातस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]रक्तोऽसौ मधुशिग्रुः [2]स्यादरिष्टः फेनिलः समौ ॥ ३१ ॥
[3]बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।
[4]प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो[5] बहुपाद्वटः ॥ ३२ ॥
[6]गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ ।
[7]आम्रश्चूतो रसालोऽसौ [8]सहकारोऽतिसौरभः ॥ ३३ ॥
[9]कुम्भीलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ।
[10]शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ॥ ३४ ॥
[11]राजादनं प्रियालःस्यात्सन्नकद्रुर्धनुष्पटः ।
[12]गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका ॥ ३५ ॥
श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः ।
[13]कर्कन्धूर्बदरी कोली कोलं कुवलफेनिले ॥ ३६ ॥
सौवीरं बदरं घोण्टाऽप्यथ [14]स्यात्स्वादुकण्टकः ।
विकंकतः स्रुवावृक्षो [15]ग्रन्थिलो व्याघ्रपादपि ॥ ३७ ॥

---

१ एकं रक्तशोभांजनस्य। २ द्वे रिष्टस्य—(रीठा)। ३ पञ्चकं बिल्वस्य—(बेल)। ४ त्रयं 'पाकर' इति ख्यातस्य। ५ त्रयं वटस्य—(बरगद)। ६ षट्कं लोध्रस्य—(लोध)। ७ त्रयमाम्रस्य—(आम)। ८ एकमतीवसौरभाम्रस्य। ९ पञ्च गुग्गुलुवृक्षस्य—(गूगल)। १० पञ्च श्लेष्मातकस्य—(लिसोड़ा)। ११ चत्वारि 'चिरौंजी' इति ख्यातस्य। १२ सप्त 'गंभारी' इति ख्यातस्य। १३ त्रीणि 'झड़बेर' इति ख्यातस्य। १४ षट्कं बदरीफलस्य—(बेर)। १५ पञ्च 'कटर' इति ख्यातस्य॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]ऐरावतो नागरङ्गो [2]नादेयी भूमिजम्बुका।
[3]तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके ॥ ३८ ॥
[4]काकेन्दुः कुलकः काकपीलुकः काकतिन्दुके।
[5]गोलीढो झाटलो घोण्टा पाटलिर्मोक्षमुष्ककौ ॥ ३९ ॥
तिलकः क्षुरकः श्रीमान् समौ [6]पिचुलझावुकौ।
[7]श्रीपर्णिका कुमुदिका कुम्भी कैडर्यकट्फलौ ॥ ४० ॥
[8]क्रमुकः पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः।
[9]तूस्तु यूपः कमुक्रो ब्रह्मण्यो ब्रह्मदारु च ॥ ४१ ॥
तूलं च [10]नीपप्रियककदम्बस्तु हरप्रिये।
[11]बीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु ॥ ४२ ॥
[12]गर्दभाण्डे कन्दरालकपीतनसुपार्श्वकाः।
प्लक्षश्च [13]तिन्तिडी चिञ्चाम्लिकाथो [14]पीतसारके ॥४३॥
सर्जकासनबन्धूकपुष्पप्रियकजीवकाः ॥

---

१ चत्वारि 'नारंगी' इति ख्यातस्य। २ चत्वारि 'तेंदु' इति ख्यातस्य। ३ चत्वारि 'कुचला' इति ख्यातस्य। ४ पञ्च लोध्रविशेषस्य। ५ त्रयं तिलकवृक्षस्य। ६ द्वे झाबुकस्य—(झाऊ)। ७ पञ्च 'कायफल' इति ख्यातस्य। ८ चत्वारि लोहितलोध्रस्य—(पठानी लोध)। ९ षट्कं 'शहतूत' इति ख्यातस्य। १० चत्वारि 'कदम' इति ख्यातस्य। ११ चत्वारि 'भेलावा' इति ख्यातस्य। १२ पञ्च 'गेठी' इति ख्यातस्य। त्रीणि चिञ्चायाः--(इमिली)। १४ षट्कं 'विजयसार' इति ख्यातस्य।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]साले तु सर्जकाश्वर्याश्वकर्णकाः सस्यसम्बरः ॥ ४४ ॥
[2]नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ।
[3]राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः ॥ ४५ ॥
[4]इङ्गुदी तापसतरुर्भूर्जे [5]चर्मिमृदुत्वचौ ।
[6]पिच्छिलापूरणी मोचा स्थिरायुःशाल्मलिर्द्वयोः ॥ ४६ ॥
[7]पिच्छा तु शाल्मलीवेष्टे [8]रोचनः कूटशाल्मलिः ।
[9]चिरबिल्वो नक्तमालः करजश्च करञ्जके ॥ ४७ ॥
[10]प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः ।
करञ्जभेदाः [11]षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ॥ ४८ ॥
[12]रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ।
[13]गायत्री बालतनयः खदिरो दन्तधावनः ॥ ४९ ॥
[14]अरिभेदो विट्खदिरे [15]कदरः खदिरे सिते ।

---

१ पञ्च शालवृक्षस्य । २ पञ्चकमर्जुनवृक्षस्य—(काहू) । ३ त्रयं 'खिरनी' इति ख्यातस्य । ४ द्वे 'जियापोता' इति ख्यातस्य । ५ त्रीणि भूर्जवृक्षस्य—(भोजपत्र) । ६ पञ्च 'सेमर' इति ख्यातस्य । ७ एकं शाल्मलीनिर्यासस्य—(सेमर की गोंद) । ८ द्वे कूटशाल्मल्याः । ९ चत्वारि करञ्जवृक्षस्य–(कंजा) । १० चत्वारि 'कांटेदार करञ्ज' इति ख्यातस्य । ११ एते त्रयः करञ्जभेदाः । १२ चत्वारि 'रक्तरोहित' इति ख्यातस्य । १३ चत्वारि खदिरस्य–(खैर) । १४ द्वे दुर्गन्धिखदिरस्य । १५ द्वयं शुक्लखदिरस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]सोमवल्कोऽप्यथ व्याघ्रपुच्छगन्धर्वहस्तकौ ॥ ५० ॥
एरण्ड उरुबूकश्च रुचकश्चित्रकश्च सः ।
चञ्चुपञ्चाङ्गुलो मण्डवर्धमानव्यडम्बकाः ॥ ५१ ॥
अल्पा शमी [2]शमीरः स्या[3]च्छमी सक्तुफला शिवा ।
[4]पिण्डीतको मरुवकः श्वसनः करहाटकः ॥ ५२ ॥
शल्यश्च मदने [5]शक्रपादपः पारिभद्रकः ।
भद्रदारु हुकिलिमं पीतदारु च दारु च ॥ ५३ ॥
पूतिकाष्ठं च सप्त स्युर्देवदारुण्यथ द्वयोः ।
[6]पाटलिः पाटलाऽमोघा काचस्थाली फलेरुहा ॥ ५४ ॥
कृष्णवृन्ता कुबेराक्षी [7]श्यामा तु महिलाह्वया ।
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ॥ ५५ ॥
विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सा ।
[8]मण्डूकपर्णपत्रोर्णनटकट्वंगटुण्टुकाः ॥ ५६ ॥
स्योनाकशुकनासक्षदीर्घवृन्तकुटन्नटाः ।
शोणकश्चारलौ तिष्यफला[9] त्वामलकी त्रिषु ॥ ५७ ॥

---

१ एकादश एरण्डस्य–(रेंडी) । २ एकमल्पशम्याः–(जाँटी) । ३ त्रयं शम्याः । ४ षट्कं 'मयनफल' इति ख्यातस्य । ५सप्त देवदारुवृक्षस्य । ६ सप्त 'पाटला' इति ख्यातस्य । ७ द्वादश प्रियङ्गु वृक्षस्य–(मालकाँगनी) । ८ द्वादश 'दिड़ा' इति ख्यातस्य–(सोनापाठा) । ९ चत्वार्यामलक्याः–(आँवला) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अमृता च वयस्था च त्रिलिङ्गस्तु [1]बिभीतकः ।
नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ॥ ५८ ॥
[2]अभया त्वव्यया पथ्या कायस्था पूतनाऽमृता ।
हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥ ५९ ॥
[3]पीतद्रुः सरलः पूतिकाष्ठं चाथ [4]द्रुमोत्पलः ।
कर्णिकारः पूरिव्याधे [5]लकुचो लिकुचो डहुः ॥ ६० ॥
[6]पनसः कण्टकिफलो [7]निचुलोऽहिञ्जलोम्बुजः ।
[8]काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला ॥ ६१ ॥
[9]अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः ।
पिचुमन्दश्च निम्बेऽथ [10]पिच्छिलाऽगुरुशिंशपाः ॥ ६२ ॥
कपिला [11]भस्मगर्भा सा [12]शिरीषस्तु कपीतनः ।
भण्डिलोप्यथ [13]चाम्पेयश्चम्पको हिमपुष्पकः ॥ ६३ ॥
एतस्य कलिका [14]गन्धफली स्यादथ [15]केसरे ।

---

१ पट् 'बहेड़ा' इति ख्यातस्य । २ एकादश हरीतक्याः–(छोटी हरें) । ३ त्रयं 'चीड़' इति ख्यातस्य । ४ त्रयं 'कठचम्पा' इति ख्यातस्य । ५ त्रयं 'बड़हर' इति ख्यातस्य । ६ द्वे 'कटहर' इति प्रसिद्धस्य । ७ त्रीणि समुद्रफलस्य–(समुद्रशोष) । ८ चत्वारि 'कठूमर' इति ख्यातस्य । ९ षट्कं निंबस्य–(नीम) । १० चत्वारि 'शीशम' इति ख्यातस्य । ११ एकं 'भूरा शीशम' इति ख्यातस्य । १२ त्रयं शिरीषस्य–(सिरस) । १३ त्रयं चम्पायाः । १४ एकमल्पचम्पकस्य कलिकायाः । १५ द्वे बकुलस्य–(मौलसिरी) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बकुले [1]वञ्जुलोऽशोके समौ [2]करकदाडिमौ ॥ ६४ ॥
[3]चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः ।
[4]जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥ ६५ ॥
[5]श्रीपर्णमग्निमन्थः स्यात्कणिका गणिकारिका ।
जयोऽथ [6]कुटजः शक्रो वासको गिरिमल्लिका ॥ ६६ ॥
एतस्यैव [7]कलिङ्गेन्द्रयवभद्रयवं फले ।
[8]कृष्णपाकफलाविप्रसुषेणा करमर्दके ॥ ६७ ॥
[9]कालस्कन्धस्तमालः स्यात्तापिच्छोऽप्यथ [10]सिन्दुके ।
सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि ॥ ६८ ॥
[11]वेणी खरा गरी देवताडो जीमूत इत्यपि ।
[12]श्रीहस्तिनी तु भूरुण्डी [13]तृणशून्यं तु मल्लिका ॥ ६९ ॥
भूपदी शीतभीरुश्च [14]सैवास्फोटा वनोद्भवा ।
[15]शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ॥ ७० ॥
सिताऽसौ [16]श्वेतसुरसा भूतवेश्यथ [17]मागधी ।

---

१ द्वे अशोकस्य । २ द्वे दाडिमस्य–(अनार) । ३ चत्वारि नागचम्पायाः । ४ पंच 'अरणी' वा 'जाती' इति ख्यातस्य । ५ पंच 'अगेथू' इति ख्यातस्य । ६ चत्वारि 'कोरैया' इति ख्यातस्य । ७ त्रीणि कुटजफलस्य–(कोरैया का फल) । ८ चत्वारि 'करौंदा' इति ख्यातस्य । ९ त्रयं तमालस्य । १० पञ्च 'निर्गुण्डी' इति ख्यातस्य । ११ पञ्च 'घवरबेल' इति ख्यातस्य । १२ द्वे हस्तिकर्णाभपत्रस्य–(अरुई) । १३ चत्वारि मल्लिकायाः–(बेला) १४ एकं 'वननेवाड़ी' इति ख्यातस्य । १५ चत्वारि कृष्णनिर्गुण्ड्याः 'काली सम्हालू' । १६ द्वे श्वेतनिर्गुण्ड्याः । १७ चत्वारि यूथिकायाः–(जूही) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गणिका यूथिकाऽम्बष्ठा सा [1]पीता हेमपुष्पिका ॥ ७१ ॥
[2]अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता ।
[3]सुमना मालती जातिः [4] सप्तला नवमालिका ॥ ७२ ॥
[5]माध्यं कुन्दं [6]रक्तकस्तु बन्धूको बन्धुजीवकः ।
[7]सहा कुमारी [8]तरणिरम्लानस्तु महासहा ॥ ७३ ॥
तत्र शोणे [9]कुरवकस्तत्र पीते [10] कुरण्टकः ।
नीला झिण्टी [11] द्वयोर्बाणा दासी चार्तगलश्च सा ॥७४॥
[12]सैरेयकस्तु झिण्टी स्यात्तस्मिन् [13]कुरवकोऽरुणे ।
पीता [14] कुरण्टको झिण्टी तस्मिन् सहचरी द्वयोः ॥७५॥
[15] ओण्ड्रपुष्पं जपापुष्पं [16]वज्रपुष्पं तिलस्य यत् ।
[17]प्रतिहासशतप्रासचण्डातहयमारकाः ॥ ७६ ॥
करवीरे [18] करीरे तु क्रकरग्रन्थिलावुभौ ।

---

१ एकं पीतपुष्पयूथिकायाः–(पीली जूही) । २ पञ्च वासन्तीलतायाः–(माधवी) । ३ त्रीणि जातेः–(चमेली) । ४ द्वे नवमालिकायाः–(मोगरा) ५ द्वे कुन्दस्य । ६ त्रीणि 'दोपहरिया' इति ख्यातस्य । ७ त्रीणि 'घीकुआर' इति ख्यातस्य । ८ द्वे 'कटसरैया' इति ख्यातस्य । ९ एकं रक्तत्वविशिष्टस्य 'कटसरैया' पुष्पस्य । १० एकं पीतवर्णायाः 'पीली कटसरैया' इति ख्यातायाः । ११ त्रयं नीलझिण्ट्याः–(नीली कटसरैया) । १२ द्वयं 'झिण्टी' इति ख्यातस्य । १३ एकमरुणझिण्ट्याः । १४ द्वयं पीतझिण्ट्याः । १५ द्वे 'अढ़ौल' इति ख्यातस्य । १६ एकं तिलपुष्पस्य । १७ पंचकं करवीरस्य–(कनेर) १८ त्रीणि 'करीर' इति ख्यातस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः ॥ ७७ ॥
मातुलो मदनाश्चास्य फले [2]मातुलपुत्रकः ।
[3]फलपूरो बीजपूरो रुचको मातुलुङ्गके ॥ ७८ ॥
[4]समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः ।
जम्बीरोऽप्यथ [5]पर्णासे कठिञ्जरकुठेरकौ ॥ ७९ ॥
[6]सितेऽर्जकोऽत्र [7]पाठी तु चित्रको वह्निसंज्ञकः ।
[8]अर्काह्वसुकाऽस्फोटकगणरूपविकीरणाः ॥ ८० ॥
मन्दारश्चार्कपर्णेऽत्र [9]शुक्लेऽलर्कप्रतापसौ ।
[10]शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ॥ ८१ ॥
[11]वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि ।
[12]वत्सादनी छिन्नरुहा गुडूची तन्त्रिकाऽमृता ॥ ८२ ॥
जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।
[13]मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ॥ ८३ ॥

---

१ सप्तकं धत्तूरस्य–(धतूरा) । २ एकं धत्तूरफलस्य । ३ चत्वारि मातुलुंगस्य–(बिजौरा) । ४ पञ्च 'श्वेत मरुआ' इति ख्यातस्य । ५ त्रीणि पर्णासस्य–(छोटी वनतुलसी) । ६ एकं श्वेतपर्णासस्य–(सफेद वन तुलसी) । ७ त्रयं चित्रकस्य–(चीता) । ८ सप्तकमर्कस्य–(मन्दार) ९ द्वे शुक्लार्कस्य–(सफेद मदार) । १० पञ्च 'बनहुला' इति ख्यातस्य । ११ चत्वारि वृक्षोपरिजातलताविशेषस्य–(बाँदा) । १२ नव 'गुडुच' इति ख्यातायाः । १३ दश 'मुरहरी' इति ख्यातस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।
[1]पाठाऽम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ॥ ८४ ॥
एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ।
[2]कटुः कटम्बराऽशोकरोहिणी कटुरोहिणी ॥ ८५ ॥
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ।
[3]आत्मगुप्ताजडाऽव्यण्डा कण्डुरा प्रावृषायणी ॥८६॥
ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छूश्च मर्कटी ।
[4]चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा ॥ ८७ ॥
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ।
[5]अपामार्गः शैखरिको धामार्गवमयूरकौ ॥ ८८ ॥
प्रत्यक्पर्णी कीशपर्णी किणिही खरमञ्जरी ।
[6]हञ्जिका ब्राह्मणी पद्मा भार्ङ्गी ब्राह्मणयष्टिका ॥ ८९ ॥
अङ्गारवल्ली बालेयशाकवर्वरवर्धकाः ।
[7]मञ्जिष्ठा विकसा जिंगी समंगा कालमेषिका ॥ ९० ॥
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।

---

१ दश 'पाठा' इति ख्यातायाः–(पाढ़) । २ अष्टौ 'कुटकी' इति ख्यातायाः । ३ नव 'केवाच' इति ख्यातायाः । ४ दश मूषिकपर्ण्याः–(मूसाकानी) । ५ अष्टकमपामार्गस्य (चिचिरा + लटजीरा) । ६ नवकं भार्ङ्ग्याः–(भारंगी) । ७ नवकं मंजिष्ठायाः–(मंजीठ) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ॥ ९१ ॥
रोदनी कच्छुराऽनन्ता समुद्रान्ता दुरालभा ।
[2]पृश्निपर्णी पृथक्पर्णीचित्रपर्ण्यङ्घ्रिपर्णिका ॥ ९२ ॥
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्षाविनिर्गुहा ।
[3]निदिग्धका स्पृशी व्याघ्री बृहती कण्टकारिका ॥ ९३ ॥
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ।
[4]नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ॥ ९४ ॥
रञ्जनी श्रीफली तुत्था द्रोणी दोला च नीलिनी ।
अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ॥९५॥
कालमेषी कृष्णफला [5]वाकुची पूतिफल्यपि ।
[6]कृष्णोपकुल्या वैदेही मागधी चपला कणा ॥ ९६ ॥
उषणा पिप्पली शौण्डी कोलाऽथ [7]करिपिप्पली ।
कविवल्ली कोलवल्ली श्रेयसी वशिरः पुमान् ॥ ९७ ॥
[8]चव्यं तु चविकं [9]काकचिञ्चा गुञ्जे तु कृष्णला ।

---

१ दशकं 'यवासा' इति ख्यातस्य–(धमासा) । २ नवकं सिंहपुच्छस्य–(पिठवन इति) । ३ दशकं 'भटकटाइ' इति ख्यातायाः । ४ एकादश नील्याः–(नील का पेड़) । ५ अष्टकं 'बकुची' इति ख्यातायाः । ६ दशकं पिप्पल्याः–(पीपर) । ७ पञ्च गजपिप्पल्याः–(गज पीपर) । ८ द्वे 'चव्य' इति ख्यातस्य । ९ त्रीणि गुञ्जायाः–(घुँघची) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]पलङ्कषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ॥ ९८ ॥
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ।
[2]विश्वा विषा प्रतिविषाऽतिविषोपविषारुणा ॥ ९९ ॥
शृङ्गी महौषधं चाथ [3]क्षीरावी दुग्धिका समे ।
[4]शतमूली बहुसुताऽभीरुरिन्दीवरी वरी ॥ १०० ॥
ऋष्यप्रोक्ताऽभीरुपत्री नारायण्यः शतावरी ।
अहेरुरथ [5]पीतद्रुकालेयकहरिद्रवः ॥ १०१ ॥
दार्वी पचम्पचा दारुहरिद्रा पर्जनीत्यपि ।
[6]वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ॥१०२॥
शुक्ला [7]हैमवती [8]वैद्यमातृसिंह्यौ तु वाशिका ।
वृषोऽटरूषः सिंहास्यो वासको वाजिदंतकः ॥ १०३ ॥
[9]आस्फोटा गिरिकर्णी स्याद्विष्णुक्रान्तापराजिता ।
[10]इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षेक्षुरक्षुराः ॥ १०४ ॥
[11]शालेयःस्याच्छीतशिवश्छत्रा मधुरिका मिसिः ।

---

१ सप्तकं 'गोखरू' इति ख्यातस्य । २ अष्टकमतिविषायाः (अतीस) । ३ द्वे 'दुद्धी' इति ख्यातायाः । ४ दशकं शतमूल्याः–(शतावरी) । ५ सप्तकं 'दारुहलदी' इति ख्यातस्य । ६ पञ्चकं 'वचा' इति ख्यातायाः । ७ एकं शुक्लवचायाः–(खुरासानी वचा) । ८ अष्टकमरूषस्य–(अडूसा) ९ चत्वारि विष्णुक्रान्तायाः–(कोयलीगोकर्णी) । १० पञ्च 'तालमखाना' इति ख्यातस्य । ११ षट्कं मधुरिकायाः–(वनसौंफ) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]मिश्रेयोऽप्यथ सेहुण्डो वज्रद्रुः स्नुक्स्नुही गुडा ॥१०५॥
समन्तदुग्धाऽथो [2]वेल्लममोघा चित्रतण्डुला ।
तण्डुलश्च कृमिघ्नश्च [3]विडङ्गं पुंन्नपुंसकम् ॥ १०६ ॥
[4]बला वाट्यालको घण्टारवा तु शणपुष्पिका ।
[5]मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ॥ १०७ ॥
[6]सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ।
त्रिभण्डी रोचनी [7]श्यामापाठिन्द्यौ तु सुषेणिका ॥१०८॥
काला मयूरविदलार्धचन्द्रा कालमेषिका ।
[8]मधुकं क्लीतकं यष्टिमधुका मधुयष्टिका ॥ १०९ ॥
[9]विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री च या सिता ।
[10]अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगन्धिका ॥११०॥
[11]लाङ्गली शारदी तोयपिप्पली शकुलादनी ।
[12]खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः ॥ १११ ॥

---

१ षट् वज्रद्रुमस्य–(सेहुंड)। २ षट्कं विडङ्गस्य ('वायविडंग' इति ख्यातस्य)। ३ द्वे 'बरिआर' इति ख्यातस्य। ४ द्वे शणपुष्पिकायाः (सनई)। ५ पञ्च द्राक्षायाः–(दाख + मुनक्का)। ६ सप्त शुक्लत्रिवृतायाः (सफेद निसोथ)। ७ सप्त कृष्णवर्णायास्त्रिवृतायाः (काली निसोथ)। ८ चत्वारि यष्टिमधुकस्य–('जेठीमधु' 'मुलेठी' इति ख्यातस्य)। ९ चत्वारि शुक्लभूमिकूष्माण्डस्य–(बिलारी कन्द)। १० त्रीणि क्षीरकन्दस्य–(दूध विदारी)। ११ चत्वारि 'जलपिप्पली' इति ख्यातायाः। १२ पंच शिखिमोदायाः–(अजमोदा)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा ।
[2]योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ॥ ११२ ॥
[3]कदली वारणबुसा रम्भा मोचांशुमत्फला ॥
काष्ठीला [4]मुद्गपर्णी तु काकमुद्गा सहेत्यपि ॥ ११३ ॥
[5]वार्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षिणी ।
[6]नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ॥ ११४ ॥
नकुलेष्टा भुजंगाक्षी छत्राकी सुवहा च सा ।
[7]विदारिगन्धाऽशुमती शालपर्णी स्थिरा ध्रुवा ॥ ११५ ॥
[8]तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च ।
[9]भारद्वाजी तु सा वन्या [10]शृङ्गी तु ऋषभो वृषः ॥ ११६ ॥
[11]गांगेरुकी नागबला झषा ह्रस्वगवेधुका ।
[12]धामार्गवो घोषकः [13]स्यान्महाजाली स पीतकः ॥ ११७ ॥

---

१ पञ्च उत्पलशारिवायाः—(सरिवन) । २ चत्वारि 'ऋद्धि'नामकस्यौषधिविशेषस्य । एतानि वृद्ध्यौषधेरपि । ३ षट् कदल्याः—(केला) । ४ त्रयं 'मुंगौनी' इति ख्यातस्य । ५ पञ्च वार्ताक्याः—(बैगन) । ६ नव रास्नायाः—(रायसन् इति ख्यातायाः) । ७ पञ्च शालपर्ण्याः (सालपर्णी इति ख्यातस्य) । ८ चत्वारि कार्पास्याः—(कपास) ९ एकं वन्यकार्पास्याः—(नर्मा) १० त्रयं 'काकड़ासींगी' इति ख्यातस्य । ११ चत्वारि नागबलायाः—(गंगेरन) १२ द्वे घोषवल्याः 'श्वेततरोई' इति ख्यातस्य—(नेनुआ) । १३ एकं पीतपुष्पघोषबल्याः—(तरोई) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]ज्यौत्स्नी पटोलिका जाली [2]नादेयी भूमिजम्बुका ।
[3]स्याल्लांगलिक्यग्निशिखा काकांगी काकनासिका ॥११८॥
[4]गोधापदी तु सुवहा [5]मुसली तालमूलिका[6] ।
[7]अजशृङ्गी विषाणी स्याद् [8]गोजिह्वादर्विके समे ॥ ११९॥
[9]ताम्बूलवल्ली ताम्बूली नागवल्ल्यप्यथ [10]द्विजा ।
हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ॥ १२० ॥
[11]एलावालुकमैलेयं सुगन्धि हरिवालुकम् ।
वालुकं चाथ [12]पालङ्क्यां मुकुन्दः कुन्दकुन्दुरू ॥ १२१ ॥
[13]चालं ह्रीबेरवर्हिष्ठोदीच्यं केशाम्बुनाम च ।
[14] कालानुसार्यवृद्धाश्म पुष्पशीतशिवानि तु ॥ १२२ ॥
शैलेयं [15] तालपर्णी तु दैत्या गन्धकुटी मुरा ।
गन्धिनी [16]गजभक्ष्या तु सुवहा सुरभी रसा ॥ १२३ ॥

---

१ त्रयं पटोलिकायाः (चिचिड़ा इति ख्यातस्य) । २ द्वे भूजम्ब्वाः–(छोटी जामुन इति ख्यातस्य) । ३ द्वे लाङ्गल्याः–(करिहारी) ४ । द्वे काकजंघायाः–(कौवाठोंठी) । ५ द्वे 'हंसपदिका' इति ख्यातायाः । ६ द्वे मुसलकन्दस्य–(मुसलीकन्द) । ७ द्वे "मेढाशृङ्गी" इति ख्यातायाः । ८ द्वे 'गोभी' इति ख्यातस्य । ९ त्रीणि नागवल्ल्याः–('पान' इति ख्यातस्य) । १० षट्कं रेणुकाख्यगन्धद्रव्यस्य–(सम्हालू के बीज) । ११ पञ्च वालुकाख्यगन्धद्रव्यस्य–(एलुआ) । १२ चत्वारि 'कुन्दुरू' इत्यस्य । १३पञ्च 'नेत्रवाला' इति ख्यातस्य । १४पञ्च शैलेयस्य–(शिलाजीत) १५ पंच 'मुरा'ख्यसुगन्धिद्रव्यस्य । १६ चत्वारि 'सलई' इति ख्यातस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महेरणा कुन्दुरुको सल्लकी ह्रादिनीति च ।
[1] अग्निज्वालासुभिक्षे तु धातकी धातृपुष्पिका ॥ १२४ ॥
[2]पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुलाऽथ सा ।
[3]सूक्ष्मोपकुञ्चिका तुत्था कोरंगी त्रिपुटा त्रुटिः ॥ १२५ ॥
[4]व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम् ।
[5]शंखिनी चोरपुष्पी स्यात्केशिन्यथ[6]वितुन्नकः ॥ १२६ ॥
झटामलाऽज्झटा ताली शिवा तामलकीति च ।
[7]प्रपौण्डरीकं पुण्डर्यमथ [8]तुन्नः कुबेरकः ॥ १२७ ॥
कुणिः कच्छः कान्तलको नन्दिवृक्षोऽथ [9]राक्षसी ।
चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः ॥ १२८ ॥
[10]व्याडायुधं व्याघ्रनखं करजं चक्रकारकम् ।
[11]शुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ॥ १२९ ॥
धमन्यञ्जनकेशी च [12] हनुर्हट्टविलासिनी ।

---

१ चत्वारि धातक्याः–(धाय, धवई) । २ पञ्चकमेलायाः–(बड़ी इलायची) । ३ पञ्चकं सूक्ष्मैलायाः–(छोटी इलायची) । ४ षट्कं 'कूठ' इति ख्यातस्य । ५ त्रयं शंखिन्याः–(चोरहुली) । ६षट्कं भूम्यामलक्याः–(भुइँअँवरा) । ७ द्वे पौण्डर्यस्य–(पुण्डरिया) । ८ षट्कं नन्दिवृक्षस्य–(तून) । ९ षट्कं चोराख्यगन्धद्रव्यस्य (भटेर) । १० चत्वारि व्याघ्रनखनामकगन्धद्रव्यस्य–(बघनखा) । ११ सप्त नखाख्यगन्धद्रव्यस्य–(छोटनखा) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुक्तिः शंखः खुरः कोलदलं [1]नखमथाढकी ॥ १३० ॥
काक्षी मृत्स्ना तुवरिका मृत्तालकसुराष्ट्रजे ।
[2]कुटन्नटं दासपुरं वानेयं परिपेलवम् ॥ १३१ ॥
प्लवगोपुरगोनर्दकैवर्ती मुस्तकानि च ।
[3]ग्रन्थिपर्णं शुकं बर्हिपुष्पं स्यौणेयकुक्कुरे ॥ १३२ ॥
[4]मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥ १३३ ॥
[5]तपस्विनी जटामांसी जटिला लोमशा मिसी ।
[6]त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ॥ १३४ ॥
[7]कर्चूरको द्राविडकः काल्पको वेधमुख्यकः ।
[8]ओषध्यो जातिमात्रे स्युरजातौ [9]सर्वमौषधम् ॥ १३५ ॥
[10]शाकाख्यम्पत्रपुष्पादि [11]तण्डुलीयोऽल्पमारिषः ।

---

१ षट् तुवरिकायाः ('अरहर' इति ख्यातस्य) । २ अष्टकं 'केवटी मोथा' इति ख्यातस्य । ३ पञ्च गठिवन' इति ख्यातस्य । ४ दशकं 'असवर' इति ख्यातस्य । ५ पंच जटामांस्याः–(जटामासी) । ६ षट् त्वक्पत्रस्य–(दालचीनी, तज) ७ चत्वारि 'कचूर' इति ख्यातस्य । ८ एकं फलपाकान्तजातेः। ९एकं रोगहरणौषधेः १०एकं भोजनसाधनस्य शाकस्य।

उक्तं च–"मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् ।
त्वक्पुष्पं कवचं चैव शाकं दशविधं स्मृतम् ॥ इति ।

११ द्वे 'चौराई' इति ख्यातस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]विशल्याग्निशिखानन्ताफलिनीशक्रपुष्पिका ॥ १३६ ॥
[2]स्यादक्षगन्धा छगलान्त्र्यावेगी वृद्धदारकः ।
जुङ्गो [3]ब्राह्मी तु मत्स्याक्षी वयस्था सोमवल्लरी ॥१३७॥
[4]पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ।
[5]हयपुच्छी तु काम्बोजी माषपर्णी महामहा ॥१३८॥
[6]तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्यपि ।
[7]वर्बरा कबरी तुङ्गी खरपुष्पाऽजगन्धिका ॥ १३९ ॥
[8]एलापर्णी तु सुवहा रास्ना युक्तरसा च सा ।
[9]चाङ्गेरी चुक्रिका दन्तशठाम्लाम्ललोणिका ॥ १४० ॥
[10]सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि ।
[11]नमस्कारी गण्डकाली समङ्गा खदिरेत्यपि ॥ १४१ ॥
[12]जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।

---

१ पंचाग्निशिखायाः–(इन्द्रपुष्पी 'कलिहारी' इतिख्यातायाः) । २ पञ्च वृद्धदारकस्य–(विधारा) । ३ चत्वारि सोमलतायाः–(ब्राह्मी) ४ चत्वारि स्वर्णक्षीर्याः–(कटेरी + भरभण्डा) । ५ चत्वारि माषपर्ण्याः 'जंगली उड़द' इति ख्यातस्य । ६ चत्वारि बिम्बिकायाः–(कुन्दुरू) ७ पंच वनतुलसिकायाः । ८ चत्वारि एलापर्ण्याः–(रास्ना) । ९ पंचाम्ललोणिकायाः–(लोनिया) । १० चतुष्कमम्लवेतसस्य–। ('अमलवेत' इति ख्यातस्य) । ११ चत्वारि 'लज्जालू' इति ख्यातस्य–(छुईमुई) । १२ पञ्च जीवन्त्याः । गुर्जर देशे 'दोडी' इति ख्यातायाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]कूर्चशीर्षो मधुरकः शृङ्गह्रस्वाङ्गजीवकाः ॥ १४२ ॥
[2]किराततिक्तो भूनिम्बोऽनार्यतिक्तोऽथ [3]सप्तला ।
विमला सातला भूरिफेना चर्मकषेत्यपि ॥ १४३ ॥
[4]वायसोली स्वादुरसा वयस्याऽथ [5]मकूलकः ।
निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ॥ १४४ ॥
[6]अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका ।
मूले [7]पुष्करकाश्मीरपद्मपत्राणि पौष्करे ॥ १४५ ॥
[8]अन्यथाऽतिचरा पद्मा चारटी पद्मचारिणी ।
[9]काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि ॥१४६॥
[10]प्रपुन्नाडस्त्वेडगजा दद्रुघ्नश्चक्रमर्दकः ।
पद्माट उरणास्यश्च [11]पलाण्डुस्तु सुकन्दकः ॥ १४७ ॥
[12]लतार्कदुर्दुर्मौ तत्र हरितेऽथ [13]महौषधम् ।
लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः ॥ १४८ ॥

---

१ पञ्च जीवकस्य । २ त्रयं 'चिरायता' इति ख्यातस्य । ३ पंच सप्तलायाः-(शिकेकाई) । ४ त्रयं काकोल्याः-(काकोडी) । ५ पंच 'दंतिया' इति ख्यातस्य । ६ चत्वारि यवान्याः 'अजवायन' इत्याख्यातस्य । ७ त्रीणि पुष्करमूलस्य । ८ पंच स्थलकमलिन्याः । ९ पंच रोचन्याः-(कबीला) । १० षट्कं 'चकवन' इति ख्यातस्य । ११ द्वे पलाण्डोः-(प्याज) । १२ द्वे हरितपलाण्डोः-(हरा प्याज) । १३ षट्कं लशुनस्य-(लासुन) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]पुनर्नवा तु शोथघ्नी [2]वितुन्नं सुनिषण्णकम् ।
[3]स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि ॥ १४९ ।
[4]पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता ।
[5]वार्षिकं त्रायमाणा स्यात् त्रायन्ती वलभद्रिका ॥ १५० ॥
विष्वक्सेनप्रिया [6]गृष्टिर्वाराही बदरेत्यपि ।
[7]मार्कवो भृङ्गराजः [8]स्यात्काकमाची तु वायसी ॥१५१॥
[9]शतपुष्पा सितच्छत्राऽतिच्छत्रा मधुरा मिसिः ।
अवाक्पुष्पी कारवी च [10]सरणा तु प्रसारिणी ॥ १५२ ॥
तस्यां कटम्भरा राजबला भद्रबलेत्यपि ।
[11]जनी जतूका रजनी जतुकृच्चक्रवर्तिनी ॥ १५३ ॥
संस्पर्शाऽस्य[12]शटी गन्धमूली षड्ग्रन्थिकेत्यपि ।
कर्चूरोऽपि पलाशोऽस्य[13]कारवेल्लः कठिल्लकः ॥१५४॥

---

१ द्वे पुनर्नवायाः–(गदहपुन्ना) २ द्वे 'चौपतिया' इति ख्यातस्य। ३ चत्वारि शणपर्ण्याः–(पटसन) । ४ पंच ज्योतिष्मत्याः–(मालकाँगनी) । ५ चतुष्कं त्रायमाणायाः । ६ चत्वारि वाराह्याः (वाराहीकन्द) । ७ द्वे 'भृङ्गराज' इति ख्यातस्य । ८ द्वे काकमाच्याः–(मकोय) । ९ सप्त 'सौंफ' इति ख्यातस्य । १० पंच 'प्रसारिण्याः'–(पसरन) । ११ षट् चक्रवर्तिन्याः–(पानड़ी) १२ पंच सट्याः–(छोटा कचूर) १३ त्रीणि कारवेल्लस्य–(करैला) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुषवी चाथ [1]कुलकं पटोलस्तिक्तकः पटुः ।
[2]कूष्माण्डकस्तु [3]कर्कारुरीर्वारुः कर्कटी स्त्रियौ ॥ १५५ ॥
[4]इक्ष्वाकुः कटुतुम्बो स्यात्तुम्ब्यलाबूरुभे[5] समे ।
[6]चित्रा गवाक्षी गोडुम्बा [7]विशाला त्विन्द्रवारुणी ॥ १५६ ॥
[8]अर्शोघ्नः सूरणः कन्दो [9]गण्डीरस्तु समष्ठिला ।
[10]कलम्ब्यु[11]पोदिका स्त्री तु [12]मूलकं [13]हिलमोचिका १५७
[14]वास्तुकं शाकभेदाः [15]स्युर्दूर्वा तु शतपर्विका ।
सहस्रवीर्या भार्गव्यौ रुहाऽनन्ताऽथ सा सिता ॥ १५८ ॥
[16]गोलोमी शतवीर्या च गण्डाली शकुलाक्षकः ।
[17]कुरुविन्दो मेघनामा मुस्तामुस्तकमस्त्रियाम् ॥ १५९ ॥
स्याद्भद्रमुस्तको गुन्द्रा चूडाला चक्रलोच्चटा ।
[18]वंशे त्वक्सारकर्मारत्वचि सारतृणध्वजाः ॥ १६० ॥
शतपर्वा यवफलो वेणुमस्करतेजनाः ।

---

१ चत्वारि पटोलस्य–(परौरा) । २ द्वे कूष्मांडस्य–(कुम्हड़ा) । ३ द्वे कर्कट्याः–(ककड़ी) । ४ द्वे कटुतुम्ब्याः–(कडुई लौकी) । ५ द्वे 'तुम्बा' इति ख्यातस्य । ६ त्रीणि गोडुम्बायाः–(कर्कटीविशेषस्य) । ७ द्वे इन्द्रवारुण्याः–(इन्द्रायण) । ८ त्रीणि सूरणस्य ('जमीकन्द' इति ख्यातस्य) । ९ द्वे गण्डीराख्यातस्य–(गाँड़र) । १० एकं 'करेमू' इति ख्यातस्य । ११ एकं 'पोइ' इति ख्यातस्य । १२ एकं 'मुरई' इति ख्यातस्य । १३ एकं 'हिलसा' इति ख्यातस्य । १४ एकं 'बथुआ' इति ख्यातस्य । १५ षट् दूर्वायाः–(दूब) । १६ चत्वारि श्वेतदूर्वायाः–(सफेद दूब) । १७ नव सभेदमुस्तायाः–(मोथा) । १८ दशकं वेणोः–(बाँस) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेणवः [1]कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ॥ १६१ ॥
[2]ग्रन्थिनां पर्वपरुषी [3]गुन्द्रतेजनकः शरः ।
[4]नडस्तु धमनः पोटगलोऽ[5]थो काशमस्त्रियाम् ॥ १६२ ॥
इक्षुगन्धा पोटगलः पुंसि भूम्नि [6]तु बल्वजाः ।
[7]रसाल इक्षुस्तद्भेदाः [8]पुण्ड्रकान्तारकादयः ॥ १६३ ॥
[9]स्याद्वीरणं वीरतरं [10] मूलेऽस्योशीरमस्त्रियाम् ।
अभयं नलदं सेव्यममृणालं जलाशयम् ॥ १६४ ॥
लामज्जकं लघुलयमवदाहेष्टकापथे ।
[11]नडादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि ॥ १६५ ॥
अस्त्री [12]कुशं कुथो दर्भः पवित्रमथ [13]कत्तृणम् ।
पौरसौगन्धिकध्यामदेवजग्धकरौहिषम् ॥ १६६ ॥
[14]छत्रातिच्छत्रपालघ्नौ मालातृणकभूस्तृणे ।
[15]शष्पं बालतृणं [16]घासो यवसं तृणमर्जुनम् ॥१६७॥

---

[1]एकं कीटादिकृतरन्ध्रगतवायुना शब्दायमानानां वेणूनाम् ('कीचक' इत्याख्यातस्य) । [2] त्रीणि वंशादिग्रन्थेः । [3] त्रीणि शरस्य–(सरहरी) । [4] त्रीणि 'नरई' इति ख्यातस्य । [5] त्रीणि काशस्य । [6] एकं 'बगई' इति ख्यातस्य । [7] द्वे इक्षोः–(ऊँख) । [8] ऐते इक्षुभेदाः ते यथा–

"इक्षुः कर्कटको वंशः कान्तारो वेणुनिःसृतः ।
इक्षुरम्यः पौण्ड्रकश्च रसालः कुसुमाकरः" इति ॥

[9] द्वे तृणभेदस्य–(गांडर) । [10] दश उशीरमूलस्य–(खस) । [11] एते सर्वे तृणविशेषाः । [12] चत्वारि कुशस्य । [13] षट् रोहिताख्यतृणविशेषस्य । [14]पञ्च जलतृणभेदस्य–(जलकुंभी = सेवार) । [15] द्वे कोमलतृणस्य–(मुलायम घास) । [16] द्वे गवादीनां भक्ष्यतृणस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]तृणानां संहतिस्तृण्या [2]नड्या तु नडसंहतिः ।
[3]तृणराजाह्वयस्तालो [4]नालिकेरस्तु लाङ्गली ॥ १६८ ॥
[5]घोण्टा तु पूगः क्रमुको गुवाकः खपुरोऽस्य तु ।
[6]फलमुद्वेगमेते च [7]हिन्तालसहितास्त्रयः ॥ १६९ ॥
खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ।
इति वनौषधिवर्गः ॥ ४ ॥

अथ सिंहादिवर्गः ।

[8]सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।
(कण्ठीरवो मृगरिपुर्मृगदृष्टिर्मृगाशनः ।
पुण्डरीकः पञ्चनखश्चित्रकायमृगद्विषः ॥ १ ॥)
[9]शार्दूलद्वीपिनौ व्याघ्रे [10]तरक्षुस्तु मृगादनः ॥ १ ॥
[11]वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥ २ ॥
[12]कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः ।
मर्कटो वानरः कीशो वनौका अथ [13]भल्लुके ॥ ३ ॥

१ द्वे तृणस्य । एकं तृणसमूहस्य । २ एकं नडसमूहस्य । ३ द्वे तालस्य–(ताड़) । ४ द्वे नालिकेरस्य–(नारियल) । ५ पञ्च पूगवृक्षस्य–(सुपारी) । ६ एकं पूगफलस्य । ७ एते हिन्तालेन सहितास्तालादयः खर्जूरादयश्चेत्यष्टौ तृणद्रुमाः । ८ षट् सिंहस्य । ९ त्रीणि व्याघ्रस्य–(बाघ) । १० द्वे 'तेंदुआ' इति ख्यातस्य । ११ द्वादश सूकरस्य (सुअर) । १२ नव वानरस्य । १३ चतुष्कं 'भालू' इति स्यख्यात ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋक्षाऽच्छभल्लभल्लूका [1]गण्डके खड्गखड्गिनौ ।
[2]लुलायो महिषो वाहद्विषत्कासरसैरिभाः ॥ ४ ॥
स्त्रियां [3]शिवा भूरिमायगोमायुर्मृगधूर्तकाः ।
शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ॥ ५ ॥
[4]ओतुर्विडालो मार्जारो वृषदंशक आखुभुक् ।
त्रयो [5]गौधेरगौधारगौधेया गोधिकात्मजे ॥ ६ ॥
[6]श्वावित्तु शल्यस्तल्लोम्नि [7]शल्ली शललं शलम् ।
[8]वातप्रमीर्वातमृगः [9]कोक ईहामृगो वृकः ॥ ७ ॥
[10]मृगे कुरंगवातायुहरिणाजिनयोनयः ।
[11]ऐणेयमेण्याश्वर्माद्यमेणस्यैणमुभे [12]त्रिषु ॥ ८ ॥
[13]कदली कन्दली चीनश्चमरुप्रियकावपि ।
समरुश्चेति हरिणा अमी अजिनयोनयः ॥ ९ ॥
[14]कृष्णसाररुरून्यङ्कुरङ्कुशंबररौहिषाः ।
गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः ॥ १० ॥
[15]गन्धर्वः शरभो रामः सृमरो गवयः शशः ।

१त्रीणि 'गैंडा' इति ख्यातस्य । २पञ्च महिषस्य–(भैंसा) । ३दश जम्बुकस्य ('सियार' इति ख्यातस्य)। ४ पञ्च मार्जारस्य–(बिलाव) । ५ त्रीणि कृष्णसर्पाद्गोधायां जातचतुष्पदस्य । ६ द्वे शल्यस्य–(साही)। ७ त्रीणि शल्यलोम्नि । ८ द्वे वातमृगस्य । ९ त्रीणि वृकस्य–(भेड़िया) । १० पञ्च हरिणस्य । ११ एकं हरिण्याश्चर्मादि । १२ एकं हरिणस्य चर्ममांसादीनाम् । १३ एते षट् हरिणभेदाः । १४एते द्वादश वृकभेदाः । १५ एते मृगभेदाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्यादयो मृगेन्द्राद्या गवाद्याः [1]पशुजातयः॥ ११ ॥
([2]अधोगन्ता तु खनको वृकः पुंध्वज उन्दुरः)
[3]उन्दुरुर्मूषकोऽप्याखुर्गिरिका [4]बालमूषिका।
[5]सरटः कृकलासः [6]स्यान्मुसली गृहगोधिका ॥ १२ ॥
[7]लूता स्त्री तन्तुवायोर्णदाभमर्कटकाः समाः।
[8]नीलङ्गुस्तु कृमिः [9]कर्णजलौकाःशतपद्युभे ॥ १३ ॥
[10]वृश्चिकः शूककीटः [11]स्यादलिद्रोणौ तु वृश्चिके।
[12]पारावतः कलरवः कपोतोऽथ [13]शशादनः ॥ १४ ॥
पत्री श्येन [14]उलूके तु वायसारातिपेचकौ।
([15]दिवान्धः कौशिको घूको दिवाभीतो निशाटनः)
[16]व्याघ्राटः स्याद्भरद्वाजः [17]खञ्जरीटस्तु खञ्जनः ॥१५॥
[18]लोहपृष्ठस्तु कङ्कः स्यादथ [19]चाषः किकीदिविः।

---

१ एतावत्कालपर्यन्तोक्ताः सर्वे सिंहादयः। २ पञ्च क्षेपकश्लोकगतनामानि मूषकस्य। ३ त्रीणि मूषकस्य। ४ द्वे स्वल्पमूषकजातेः। ५ द्वे 'गिरगिट' इति ख्यातस्य। ६ द्वे गृहगोधायाः-(छिपकली)। ७ चत्वारि ऊर्णनाभस्य-(मकड़ी)। ८ द्वे 'सोनकीड़ा' इति ख्यातस्य। ९ द्वे कर्णजलौकायाः-(कनखजूरा)। १० द्वे शूककीटस्य-(ऊर्णादिभक्षककृमिविशेषः) ११ त्रीणि वृश्चिकस्य-(बिच्छू)। १२ त्रीणि पारावतस्य-(कबूतर)। १३ त्रीणि 'बाज' इति ख्यातस्य। १४ त्रीणि उलूकस्य-(उल्लू)। १५ पंचकमप्युलूकस्य। १६द्वे भरद्वाजस्य-(भर्दूल)। १७ द्वे चलत्पक्षस्य-(खंजरीट)। १८ द्वे कंकपक्षिणः-(कड़ाकुल)। १९ द्वे 'चाष' इति ख्यातस्य।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]कलिङ्गभृङ्गधूम्याटा अथ [2]स्याच्छतपत्रकः ॥ १६ ॥
दार्वाघाटोऽथ [3]सारङ्गः स्तोकककश्चातकः समाः ।
[4]कुक्कवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥ १७ ॥
[5]चटकः कलविङ्कः स्यात्तस्य स्त्री [6]चटका तयोः ।
पुमपत्ये [7]चाटकैरः स्त्र्यपत्ये चटकैव हि ॥ १८ ॥
[8]कर्करेटुः करेटुः [9]स्यात्कृकणक्रकरौ समौ ।
[10]वनप्रियः वरभृतः कोकिला पिक इत्यपि ॥ १९ ॥
[11]काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ।
[12]ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥ २० ॥
(स एव च चिरञ्जीवी चैकदृष्टिश्च मौकुलिः)
[13]द्रोणकाकस्तु काकोलो [14]दात्यूहः कालकण्टकः ।
[15]आतायिचिल्लौ [16]दाक्षाय्यगृध्रौ [17]कीरशुकौ समौ॥२१॥
[18]क्रुङ् क्रौञ्चोऽथ [19]बकः कहः [20]पुष्कराह्वस्तु सारसः ।

---

१ त्रीणि 'कलिंग' इति ख्यातस्य । २ द्वे 'कठफोरा' इति ख्यातस्य । ३ त्रीणि चातकस्य-(पपीहा) । ४ चत्वारि कुक्कुटस्य-(मुर्गा)। ५ द्वे चटकस्य-(गरगरैया) । ६ एकं चटकस्त्रियाः । ७ एकं चटकाचटकयोः पुमपत्ये, स्त्र्यपत्ये चटकैव । ८ द्वे 'करढोक' इति ख्यातस्य । ९ द्वे करेटुभेदस्य । १० चत्वारि कोकिलस्य-(कोयल)। ११ दश काकस्य-(कौआ) । १२ एतान्यपि त्रीणि काकस्य । १३ द्वे 'डोडकाक' इति ख्यातस्य । १४ द्वे 'कृष्णकाक' इति ख्यातस्य । १५ द्वे चिल्लस्य-(चील) । १६ द्वे गृध्रस्य १७ द्वे कीरस्य-(तोता)। १८ द्वे क्रौंच 'कराकुन' इति ख्यातस्य। १९ द्वे बकस्य ('बगला' इति ख्यातस्य) । २० द्वे सारसस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः ॥ २२ ॥
[2]कादम्बः कलहंसः [3]स्यादुत्क्रोशकुररौ समौ ।
[4]हंसास्तु श्वेतगरुतश्चक्रांगा मानसौकसः ॥ २३ ॥
[5]राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ।
[6]मल्लिनैर्मल्लिकाक्षास्ते [7]धार्तराष्ट्राः सितेतरैः ॥ २४ ॥
[8]शरारिराटिराडिश्च [9]बलाका बिसकण्ठिका ।
[10]हंसस्य योषिद्वरटा [11]सारसस्य तु लक्ष्मणा ॥ २५ ॥
[12]जतुकाऽजिनपत्रा [13]स्यात्परोष्णी तैजपायिका ।
[14]वर्वणा मक्षिका नीला [15]सरघा मधुमक्षिका ॥ २६ ॥
[16]पतंगिका पुत्तिका [17]स्याद्दंशस्तु वनमक्षिका ।
दंशा [18]तज्जातिरल्पा [19]स्याद्गन्धोली वरटा द्वयोः ॥ २७ ॥
[20]भृङ्गारी झीरुका चीरी झिल्लिका च समा इमाः ।

---

१ चत्वारि चक्रवाकस्य (चकवा) । २ द्वे कलहंसस्य (बत्तक) । ३ द्वे कुररस्य । ४ चत्वारि हंसस्य । ५ एकं राजहंसानाम् । ६ एकं मल्लिकाक्षाणाम् । ७ एकं धार्तराष्ट्राणाम् । ८ त्रीणि आडीति ख्यातस्य । ९ द्वे 'बगुली' इति ख्यातस्य । १० एकं हंसस्य स्त्रियः । ११ एकं सारसस्त्रियः । १२ द्वे 'चिमगादर' इति ख्यातस्य । १३ द्वे पक्षयुक्त-कीटविशेषस्य (चमरी इत्याख्यातायाः) । १४ त्रीणि नीलमक्षिकायाः । १५ द्वे मधुमक्षिकायाः । १६ द्वे लघुमक्षिकायाः । १७ द्वे 'वनमाखी' 'डाँस' इति ख्यातस्य । १८ एकं 'लघुडाँस' इति ख्यातस्य । १९ द्वे 'बरड़ गन्धेली' इत्याख्यातायाः । २० चत्वारि झिल्ल्याः-(झींगुर)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समौ [1]पतंगशलभौ खद्योतो [2]ज्योतिरिङ्गणः ॥ २८ ॥
[3]मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ।
द्विरेफपुष्पलिड् भृङ्गषट्पदभ्रमरालयः ॥ २९ ॥
[4]मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।
शिखावलः शिखी केकी मेघनादानुलास्यपि ॥ ३० ॥
केका [5]वाणी मयूरस्य समौ [6]चन्द्रकमेचकौ ।
[7]शिखा चूडा [8]शिखण्डस्तु पिच्छबर्हे नपुंसकौ ॥ ३१ ॥
[9]खगे विहङ्गविहगविहङ्गमविहायसाः ।
शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ॥ ३२ ॥
पतत्त्रिपत्त्रपतगपतत्पत्त्ररथाण्डजाः ।
नगौको वाजिविकिरः विविष्कपतन्त्रयः ॥ ३३ ॥
नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसंगमाः ।
[10]तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ॥ ३४ ॥
तित्तिरिः कुक्कुभो लावो जीवञ्जीवश्चकोरकः ।
कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादयः ॥ ३५ ॥
[11]गरुत्पक्षच्छदाः पत्त्रं पतत्त्रञ्च तनूरुहम् ।

---

१ द्वे दीपाभिमुखमागच्छतः पतङ्गस्य—(फतिंगा) । २ द्वे खद्योतस्य 'जुगुनू' इति ख्यातस्य । ३ एकादश भ्रमरस्य । ४ नव मयूरस्य । ५ एकं मयूरवाण्याः । ६ द्वे पिच्छस्य—(मोरपंख) । ७ द्वे मयूरशिखायाम् । ८ त्रीणि मयूरपिच्छस्य । ९ सप्तविंशतिः पक्षिमात्रस्य । १० एकैकं पक्षिभेदस्य । ११ षट् पक्षिणां पक्षस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]स्त्री पक्षतिः पक्षमूलं [2]चञ्चुस्त्रोटिरुभे स्त्रियौ ॥ ३६ ॥
[3]प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः ।
[4]पेशीकोषो द्विहीनोऽण्डं [5]कुलायो [6]नीडमस्त्रियाम् ॥३७॥
[7]पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।
[8]स्त्रीपुंसौ मिथुनं द्वन्द्वं [9]युग्मं तु युगलं युगम् ॥ ३८ ॥
[10]समूहनिवहव्यूहसंदोहविसरव्रजाः ।
स्तोमौघनिकरव्रातवारसंघातसंचयाः ॥ ३९ ॥
समुदायः समुदयः समवायश्चयो गणः ।
स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ॥ ४० ॥
वृन्दभेदाः [11]समैर्वर्गः [12]संघसार्थौ तु जन्तुभिः ।
सजातीयैः [13]कुलं यूथं तिरश्चां पुन्नपुंसकम् ॥ ४१ ॥
पशूनां [14]समजोऽन्येषां [15]समाजोऽथ सधर्मिणाम् ।

---

१ एकं पक्षमूलस्य । २ द्वे पक्षितुण्डस्य । ३ एतास्तिस्रः खगानां गतिक्रियाः । ४ त्रीणि अण्डस्य । ५ द्वे पक्षिगृहस्य–(खोता) । ६ सप्त पक्षिशिशोः बालकमात्रस्य–(गेदा) । ७ त्रीणि स्त्रीपुरुषयुग्मस्य–(नरमादीका जोड़ा) । ८ त्रीणि युग्मस्य । ९ द्वाविंशतिः समुदायस्य समूहस्य–(झुण्ड) । १० एकं सजातीयप्राणिसमूहस्य । ११ द्वे प्राणिसमूहस्य । १२ एकं सजातीयजन्तुसमूहस्य । १३ एकं सजातीयतिरश्चां समूहस्य । १४ एकं पशुसमूहस्य । १५ एकं पशुभिन्नानां वृन्दस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]स्यान्निकायः पुञ्जराशी तूत्करः कूटमस्त्रियाम् ॥ ४२ ॥
[2]कापोतशौकमायूरतैत्तिरादीनि तद्गणे ।
गृहासक्ताः [3]पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥ ४३ ॥

इति सिंहादिवर्गः ॥ ६ ॥

—०—

मनुष्यवर्गः ।

[4]मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
[5]स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः ॥ १ ॥
[6]स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥
[7]विशेषास्त्वंगना भीरुः कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ ३ ॥
सुन्दरी रमणी रामा [8]कोपना सैव भामिनी ।
[9]वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥
[10]कृताभिषेका महिषी [11]भोगिन्योऽन्या नृपस्त्रियः ।

---

१ चत्वारि धान्यादिराशेः । २ प्रत्येकं तज्जातिसमूहस्य । ३ द्वे गृहासक्तपक्षिमृगाणाम्—(पालतू पंछी) । ४षट् मनुष्याणाम् । ५पंच पुरुषस्य । ६ एकादश स्त्रियाः । ७ रामापर्यंतं स्त्रीणां विशेषभेदाः । ८ द्वे कोपशीलायाः । ९ चत्वारि गुणैरुत्कृष्टायाः । १० एकं कृताभिषेकायाः—(राजमहिषी) । ११ एकं नृपस्त्रीणाम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५ ॥
भार्या जायाथ पुम्भूम्नि दाराः स्यात्तु [3]कुटुम्बिनी ।
पुरन्ध्री [3]सुचरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥
[4]कृतसापत्निकाऽध्यूढाऽधिविन्नाथ [5]स्वयंवरा ।
पतिंवरा च वर्या च [6]कुलस्त्री कुलपालिका ॥ ७ ॥
[7]कन्या कुमारी [8]गौरी तु नग्निकाऽनागतार्तवा ।
[9]स्यान्मध्यमा दृष्टरजास्तरुणी[10]युवतिः समे ॥ ८ ॥
समाः [11]स्नुषा जनी [12]वध्वश्चिरण्टी तु सुवासिनी ।
[13]इच्छावती कामुका स्याद् [14]वृषस्यन्ती तु कामुकी ॥९॥
[15]कान्तार्थिनी तु या याति संकेतं साऽभिसारिका ।
[16]पुंश्चली धर्षिणी वन्धक्यसती कुलटेत्वरी ॥ १० ॥
स्वैरिणी पांसुला च [17]स्यादशिश्वी शिशुना विना ।
[18]अवीरा निष्पतिसुता [19]विश्वस्ताविधवे समे ॥ ११ ॥

---

१ सप्त परिणीतायाः स्त्रियाः–(व्याहृता स्त्री) । २ द्वे पतिपुत्रादियुतायाः । ३ चत्वारि पतिसेवातत्पराया: । ४ त्रीणि कृतानेकविवाहस्य पुरुषस्य । ५ त्रीणि स्वेच्छया पतिवरणोद्युक्तायाः । ६ द्वे कुलवत्याः । ७ द्वे कन्यायाः । ८ त्रीण्यदृष्टरजस्काया: । ९ द्वे प्रथमप्राप्तरजोदर्शनायाः । १० द्वे मध्यमे वयसि वर्तमानायाः । ११ त्रीणि पुत्रभार्यायाः । १२ द्वे किंचिल्लब्धयौवनायाः । १३द्वे धनादीच्छावत्याः । १४ द्वे मैथुनेच्छावत्याः। १५ एकं अभिसारिकायाः। १६ अष्टौ स्वैरिण्याः–(कुलटा) । १७ एकं पुत्ररहितायाः–(बंध्या) । १८ एकं पतिपुत्ररहितायाः । १९ द्वे विधवायाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]आलिः सखी वयस्याऽथ [2]पतिवत्नी सभर्तृका ।
[3]वृद्धा पलिक्नी [4]प्राज्ञी तु प्रज्ञा [5]प्राज्ञा तु धीमती ॥१२॥
शूद्री [6]शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च ।
आभीरी [7]तु महाशूद्री जातिपुंयोगयोः समा ॥ १३ ॥
अर्याणी [8]स्वयमर्या स्यात्क्षत्रिया क्षत्रियाण्यपि[9] ।
[10]उपाध्यायाप्युपाध्यायी [11]स्यादाचार्यापि च स्वतः॥१४॥
आचार्यानी [12]तु पुंयोगे स्यादर्यी क्षत्रिया तथा ।
उपाध्यायान्युपाध्यायी [13]पोटा स्त्रीपुंसलक्षणा ॥ १५ ॥
वीरपत्नी [14]वीरभार्या वीरमाता [15]तु वीरसूः ।
जातापत्या [16]प्रजाता च प्रसूता च प्रसूतिका ॥ १६ ॥
स्त्री नग्निका [17]कोटवी स्याद्दूती [18]संचारिके समे ।
कात्यायन्यर्धवृद्धा [19]या काषायवसनाऽथवा ॥ १७ ॥
सैरन्ध्री [20]परवेश्मस्था स्ववशा शिल्पकारिका ।
असिक्नी स्या[21]द्वृद्धा या प्रेष्याऽन्तःपुरचारिणी ॥१८॥

१ त्रीणि सख्याः । २ द्वे जीवद्भर्तृकायाः-(सोहागिन) । ३ द्वे पक्व-केश्याः । ४ द्वे विदुष्याः । ५ द्वे बुद्धिमत्याः । ६ एकं शूद्रस्त्रियाः शूद्रेति तज्जातेः । ७ द्वे गोपालिकायाः ('अहिरिन' इत्याख्यातायाः) । ८ द्वे वैश्यभार्यायाः । ९ द्वे क्षत्रियभार्यायाः । १० द्वे स्वयमध्यापि-कायाः । ११ एकमाचार्यस्य स्त्रियाः । १२ द्वे उपाध्यायस्य भार्यायाः । १३ एकं स्तनश्मश्रुरूपेण स्त्रीपुंसचिह्नेन युक्तायाः । १४ द्वे वीरभार्यायाः । १५ द्वे वीरमातुः । १६ चत्वारि प्रसूतायाः । १७ एकं नग्नस्त्रियाः । १८ द्वे दूतिकायाः। १९ एकमर्धवृद्धेत्यादिविशेषणविशिष्टायाः। २० एकं पर-गृहे स्थित्वा केशप्रसाधनकारिण्याः। २१ एकमवृद्धेति विशेषणत्रयोपेतायाः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वारस्त्री गणिका [1]वेश्या रूपाजीवाऽथ सा जनैः ।
सत्कृता [2]वारमुख्या स्यात्कुट्टनी [3]शम्भली समे ॥ १९ ॥
[4]विप्रश्निका त्वीक्षणिका दैवज्ञाऽथ [5]जस्वला ।
स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि ॥ २० ॥
ऋतुमत्यप्युदक्यापि [6]स्याद्रजः पुष्पमार्तवम् ।
[7]श्रद्धालुर्दोहदवती निष्कला [8]विगतार्तवा ॥ २१ ॥
[9]आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी ।
गणिकादेस्तु [10]गाणिक्यं गार्भिणं यौवतं गणे ॥ २२ ॥
[11]पुनर्भूर्दिधिषू रूढा द्विस्तस्या [12]दिधिषुः पतिः ।
स तु द्विजोग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥ २३ ॥
[13]कानीनः कन्यकाजातः सुतोऽथ [14]सुभगासुतः ।
सौभागिनेयः [15]स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥ २४ ॥

---

१ चत्वारि वेश्यायाः । २ एकं जनसत्कृतवेश्यायाः । ३ द्वे कुट्टन्याः ४ त्रीणि शुभाशुभनिरूपिण्याः । ५ अष्टौ रजस्वलायाः । ६ त्रीणि स्त्रीरजसः । ७ द्वे दोहदवत्याः । ८ द्वे हीनरजस्कायाः । ९ चत्वारि गर्भिण्याः । १० एकैकं तत्तत्समूहस्य । ११ द्वे द्विवारं वृतायाः । १२ एकं पुनर्भूपतेः । १३ एकं कन्यकासुतस्य । १४ द्वे सुभगापुत्रस्य । १५ एकं परस्त्रीपुत्रस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]पैतृष्वसेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः ।
सुतो मातृष्वसुश्चैव [2]वैमात्रेयो विमातृजः ॥ २५ ॥
अथ [3]बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः ।
कौलटेरः कौलटेयो भिक्षुकी तु सती यदि ॥ २६ ॥
तदा [4]बान्धकिनेयोऽस्याः कौलटेयोऽपि चात्मजः ।
[5]आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ॥ २७ ॥
आहुर्दुहितरं [6]सर्वेऽपत्यं तोकं तयोः समे ।
[7]स्वजाते त्वौरसौरस्यौ [8]तातस्तु जनकः पिता ॥ २८ ॥
[9]जनयित्री प्रसूर्माता जननी [10]भगिनी स्वसा ।
[11]ननान्दा तु स्वसा पत्युर्नप्त्री पौत्री [12]सुतात्मजा ॥२९॥
भार्यास्तु भ्रातृवर्गस्य [13]यातरः स्युः परस्परम् ।
[14]प्रजावती भ्रातृजाया मातुलानी [15]तु मातुली ॥ ३० ॥

---

१ द्वे पितृभगिनीसुतस्य–(फुआ का बेटा) । एकं मातृभगिनी-सुतस्य–(मौसी का लड़का) । २ एकं सापत्न्यबन्धोः–(सौतेला भाई) । ३ पञ्च कुलटापुत्रस्य । ४ द्वे भिक्षार्थं प्रतिगेहमटन्त्याः पुत्रस्य । ५ पञ्च पुत्रस्य । ६ द्वे तनयदुहित्रोः । ७ एकं स्वपुत्रस्य । ८ त्रीणि पितुः । ९ चत्वारि जनन्याः । १० द्वे स्वसुः–(बहिन) । ११ एकं पतिभगिन्याः–(ननद) । १२ द्वे सुतस्य सुतायाः । १३ एकं भ्रातृवर्गस्य भार्याणाम्–(देवरानी-जेठानी) १४ एकं भ्रातृजायायाः–(भौजाई = भयौ) । १५ द्वे मातुलान्याः–(मामी) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पतिपत्न्योः प्रसूः [1]श्वश्रूः [2]श्वशुरस्तु पिता तयोः ।
पितुर्भ्राता [3]पितृव्यः स्यान्मातुर्भ्राता तु [4]मातुलः ॥ ३१ ॥
[5]श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो [6]देवृदेवरौ ।
[7]स्वस्रीयो भागिनेयः [8]स्याज्जामाता दुहितुः पतिः ॥ ३२ ॥
[9]पितामहः पितृपिता तत्पिता [10]प्रपितामहः ।
मातुर्मातामहाद्येवं [11]सपिण्डास्तु सनाभयः ॥ ३३ ॥
[12]समानोदर्यसोदर्यसगर्भ्यसहजाः समाः ।
[13]सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥ ३४ ॥
[14]ज्ञातेयं [15]बन्धुता तेषां क्रमाद् भावसमूहयोः ।
[16]धवः प्रियः पतिर्भर्ता [17]जारस्तूपपतिः समौ ॥ ३५ ॥
अमृते जारजः [18]कुण्डो मृते भर्तरि [19]गोलकः ।

---

१ एकं पत्युः पत्न्या वा मातरि । २ एकं श्वशुरस्य । ३ एकं पितुर्भ्रातरि–(चाचा) । ४ एकं मातुर्भ्रातरि–(मामा) । ५ एकं पत्न्या भ्रातरि–(साला) । ६ द्वे पत्युर्भ्रातरि–(देवर) । ७ द्वे भगिन्याः पुत्रे–(भांजा) । ८ एकं कन्याया भर्तुः–(दामाद) । ९ द्वे पितुः पितरि–(दादा) । १० एकं पितामहस्य पितुः–(परदादा) । ११ द्वे सप्तपुरुषावधिज्ञातिषु । १२ चत्वारि सहोदरस्य भ्रातुः–(सगा भाई) । १३ षट् सगोत्रस्य–(गोतिया) । १४ एकं ज्ञातीनां भावस्य । १५ एकं बन्धुसमूहस्य । १६ चत्वारि पत्युः । १७ द्वे मुख्यादन्यभर्तुः–(यार) । १८ एकममृते भर्तरि जाराज्जातस्य । १९ एकं मृते भर्तरि जाराज्जातस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]भ्रात्रियो भ्रातृजो भ्रातृभगिन्यौ [2]भ्रातरावुभौ ॥ ३६ ॥
[3]मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।
[4]श्वश्रू श्वशुरौ श्वशुरौ [5]पुत्रौ पुत्रश्च दुहिता च ॥ ३७ ॥
[6]दम्पती जम्पती जायापती भार्यापती च तौ ।
[7]गर्भाशयो जरायुः स्यादुल्बं च [8]कललोऽस्त्रियाम् ॥३८॥
[9]सूतिमासो वैजननो [10]गर्भो भ्रूण इमौ समौ ।
[11]तृतीया प्रकृतिः षण्ढः क्लीबः षण्डो नपुंसके ॥ ३९ ॥
[12]शिशुत्वं शैशवं बाल्यं [13]तारुण्यं यौवनं समे ।
[14]स्यात्स्थाविरं तु वृद्धत्वं वृद्धसंघेऽपि वार्धकम् ॥ ४० ॥
[15]पलितं जरसा शौक्ल्यं केशादौ [16]विस्रसा जरा ।
स्यादुत्तानशया [17]डिम्भा स्तनपा च स्तनन्धयी ॥ ४१ ॥
[18]बालस्त स्यान्माणवको [19]वयस्थस्तरुणो युवा ।

---

१ द्वे भ्रातृपुत्रस्य-(भतीजा)। २ एकं भ्रातृभगिन्योः-(भाई-बहिन)। ३ चत्वारि मात्रा सहोक्तं पितरि-(माता-पिता)। ४ द्वे सहोक्तयोः श्वश्रूश्वशुरयोः । ५ एकं पुत्रदुहित्रोः-(लड़का-लड़की)। ६ चत्वारि दम्पत्योः-(स्त्री-पुरुष) ७ त्रीणि गर्भवेष्टनचर्मणः-(झिल्ली) ८ एकं शुक्रशोणितमिश्रीभवनस्य । ९ द्वे प्रसवमासस्य । १० द्वे कुक्षिस्थस्य प्राणिनः । ११ पंच नपुंसकस्य । १२ त्रयं बालत्वे-(लड़कपन)। १३ द्वे तरुणत्वे-(जवानी)। १४ त्रीणि वृद्धत्वे वार्द्धके-(बुढ़ापा)। १५ एकं जराप्राप्तकेशधवलिमायाः। १६ द्वे जरायाः। १७ चत्वारि स्तनन्धयायाः-(दूधपीती बच्ची)। १८ द्वे बालस्य। १९ त्रीणि यूनः-(जवान)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥ ४२ ॥
[2]वर्षीयान्दशमी ज्यायान् [3]पूर्वजस्त्वग्रियोऽग्रजः ।
[4]जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः ॥ ४३ ॥
[5]अमांसो दुर्बलश्छातो [6]बलवान्मांसलोऽसलः ।
[7]तुन्दिलस्तुन्दिभस्तुन्दी बृहत्कुक्षिः पिचण्डिलः ॥ ४४ ॥
[8]अवटीटोऽवनाटश्चाऽवभ्रष्टो नतनासिके ।
[9]केशवः केशिकः केशी [10]बलिनो बलिभः समौ ॥४५॥
[11]विकलाङ्गस्त्वपोगण्डः [12]खर्वो ह्रस्वश्च वामनः ।
[13]खरणाः स्यात्खुरणसो [14]विग्रस्तु गतनासिकः ॥४६॥
[15]खुरणाः स्यात्खुरणसः [16]प्रञ्जुः प्रगतजानुकः ।
[17]ऊर्ध्वज्ञुरूर्ध्वजानुः [18]स्यात्संज्ञः संहतजानुकः ॥४७॥
[19]स्यादेडे बधिरः [20]कुब्जे गडुलः [21]कुकरे कुणिः ।

---

१ षट्कं वृद्धस्य । २ त्रीण्यतिवृद्धस्य । ३ त्रीणि ज्येष्ठभ्रातुः । ४ पञ्च कनिष्ठभ्रातुः । ५ त्रीणि अबलस्य-(निर्बल) । ६ त्रीणि बलवतः । ७ पञ्च बृहदुदरस्य-(तोंदीला) । ८ चत्वारि चिपिटनासिकस्य-(नकचिपटा) । ९ त्रयं प्रशस्तकेशस्य । १० द्वे जरया श्लथचर्मणः-(झुर्री) । ११ द्वे निसर्गतो न्यूनावयवस्य । १२ त्रीणि ह्रस्वस्य-(बौना) । १३ द्वे तीक्ष्णनासिकस्य । १४ द्वे गतनासिकस्य-(नकटा) । १५ द्वे विकटनासिकस्य । १६ द्वे यस्य जान्वोर्महदन्तरालं तस्य । १७ द्वे ऊर्ध्वजानुकस्य । १८ द्वे संलग्नजानुकस्य । १९ द्वे बधिरस्य-(बहरा) । २० द्वे कुब्जस्य-(कुबड़ा) । २१ द्वे रोगादिना दूषितकरस्य-(लूला) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१पृश्निरल्पतनौ २श्रोणः पङ्गौ ३मुण्डस्तु मुण्डिते ॥ ४८ ॥
४वलिरः केकरे ५खोडे खञ्जस्त्रिषु जरावराः ।
६जडुलः कालकः ७पिप्लुस्तिलकस्तिलकालकः ॥ ४९ ॥
८अनामयं स्यादारोग्यं ९चिकित्सा रुक्प्रतिक्रिया ।
१०भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥ ५० ॥
स्त्री ११रुग्रुजा चोपतापरोगव्याधिगदामयाः ।
१२क्षयः शोषश्च यक्ष्मा च १३प्रतिश्यायस्तु पीनसः॥ ५१ ॥
स्त्री १४क्षुत् क्षुतं क्षवः पुंसि १५कासस्तु क्षवथुःपुमान् ।
१६शोफस्तु श्वयथुः शोथः १७पादस्फोटो विपादिका ॥५२॥
१८किलाससिध्मे १९कच्छ्वां तु पामपामा विचर्चिका ।
२०कण्डूः खर्जूश्च कण्डूया २१विस्फोटः पिटकस्त्रिषु॥५३॥
२२व्रणोऽस्त्रियामीर्मरुः क्लीबे २३नाडीव्रणः पुमान् ।

---

१ द्वे अल्पतनुप्राणिनः–(नाटा) । २ द्वे जंघाविकलस्य–(पंगुल) । ३ द्वे कृतवपनस्य–(मुण्डा) । ४ द्वे नेत्रविकृतस्य–(टपंखा)। ५ द्वे गतिविकलस्य–(लंगड़) । ६ त्रीणि देहगतस्य कृष्णबिन्दोः–(मासा) । ७ द्वे तिलवच्चिह्नस्य । ८ द्वे रोगाभावस्य । ९ द्वे रोगप्रतीकारस्य । १० पञ्चौषधस्य–(दवा) । ११ सप्त रोगस्य । १२ त्रीणि क्षयरोगस्य । १३ द्वे पीनसरोगस्य । १४ त्रीणि छिक्केति ख्यातायाः । १५ द्वे कासरोगस्य–(खाँसी) । १६ त्रीणि शोथस्य–(सोथ) । १७ द्वे पादस्फोटस्य–(बेवाय) । १८ द्वे सोध्मस्य–(मुँहासा) । १९ चतुष्कं खर्जुविशेषस्य । २० त्रयं खर्ज्वाः । २१ 'द्वे फोड़ा' इति ख्यातस्य । २२ त्रीणि व्रणस्य–(घाव) । २३ एकं नित्यगलद्व्रणस्य–(नासूर) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]कोठा मण्डलकं कुष्ठश्वित्रे [2]दुर्नामकार्शसी ॥ ५४ ॥
[3]आनाहस्तु विबन्धः स्याद् [4]ग्रहणीरुक् प्रवाहिका ।
[5]प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥ ५५ ॥
व्याधिभेदा [6]विद्रधिः स्त्री ज्वरमेहभगन्दराः ।
([7]श्लीपदं पादवल्मीकं [8]केशघ्नस्त्विन्द्रलुप्तकः)
[9]अश्मरी मूत्रकृच्छ्रं स्यात्पूर्वे शुक्रावधैस्त्रिषु ॥ ५६ ॥
[10]रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सके ।
[11]वार्तो निरामयः कल्य [12]उल्लाघो निर्गतो गदात् ॥५७॥
[13]ग्लानग्लास्नू [14]आमयावी विकृतो व्याधितोऽपटुः ।
आतुरोऽभ्यमितोऽभ्यान्तः समौ [15]पामनकच्छुरौ ॥ ५८ ॥
[16]दद्रुणो द्रुरोगी स्यादर्शोरोगयुतोऽ[17]र्शसः ।
[18]वातकी वातरोगी [19]स्यात्सातिसारोऽतिसारकी ॥५९॥
स्युः [20]क्लिन्नाक्षे चुल्लचिल्लपिल्लाःक्लिन्नेऽक्षिणचाप्यमी ।

---

१ चत्वारि कुष्ठस्य–(कोढ़)। २ द्वे अर्शोरोगस्य–(बवासीर)। ३ द्वे मलमूत्रनिरोधस्य । ४ द्वे संग्रहणीरोगस्य । ५ त्रीणि वमनरोगस्य । ६ इत्यादयो व्याधिभेदाः । ७ द्वे श्लीपदरोगस्य–(पीलपावँ)। ८ द्वे मस्तककेशरोगस्य–(गंजा)। ९ द्वे अश्मर्याः–(पथरी) । १० पञ्च वैद्यस्य । ११ त्रीणि रोगरहितस्य । १२ एकं रोगान्मुक्तस्य । १३ द्वे रोगादिवशाद्दुर्बलस्य । १४ सप्तकं रोगिणः । १५ द्वे पामनस्य । १६ द्वे दद्रुरोगिणः । १७ एकमर्शोरोगयुक्तस्य (बवासीर का रोगी)। १८ द्वे वातरोगयुक्तस्य । १९ द्वे अतिसारयुक्तस्य । २० चत्वारि क्लेदयुक्ताक्षिवतः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]उन्मत्त उन्मादवति [2]श्लेष्मलः श्लेष्मणःकफी ॥ ६० ॥
[3]न्युब्जो भुग्ने रुजा वृद्धनाभौ [4]तुन्दिलतुन्दिभौ ।
[5]किलासी [6]सिध्मलोऽन्धोऽदृङ् [7]मूर्छाले मूर्तमूर्छितौ ॥६१॥
[8]शुक्रं तेजो रेतसी च बीजवीर्येन्द्रियाणि च ।
[9]मायुः पित्तं [10]कफः श्लेष्मा स्त्रियां तु [11]त्वगसृग्धरा ॥६२॥
[12]पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।
[13]उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम् ॥ ६३ ॥
[14]रुधिरेऽसृग्लोहितास्रं रक्तक्षतजशोणितम् ।
[15]बुक्काग्रमांसं हृदयं [16]हृन्मेदस्तु वपा [17]वसा ॥ ६४ ॥
पश्चाद्ग्रीवाशिरा [18]मन्या [19]नाडी तु धमनिः शिरा ।
[20]तिलकं क्लोम [21]मस्तिष्कं गोर्द [22]किट्टं मलोऽस्त्रियाम् ॥६५॥

---

१ द्वे उन्मादयुक्तस्य । २ त्रीणि कफयुक्तस्य । ३ एकं रुजा वक्रस्य । ४ त्रीणि वातादिनोन्नतनाभेः । ५ द्वे सिध्मयुक्तस्य । ६ द्वे दृष्टिहीनस्य । ७ त्रीणि मूर्च्छायुक्तस्य । ८ षट् रेतसः । ९ द्वे पित्तस्य । १० द्वे कफस्य । ११ द्वे चर्मणः । १२ षट्कं मांसस्य । १३ त्रीणि शुष्कमांसस्य । १४ सप्त रुधिरस्य । १५ द्वे 'कलेजा' इति ख्यातस्य । १६ द्वे हृदयाख्यनिम्नदेशस्य । १७ त्रीणि मांसजन्यस्नेहस्य—(चर्बी) । १८ एकं पश्चात्स्थितायाः ग्रीवाशिरायाः । १९ त्रयं शिरायाः 'नाड़ी' इत्याख्यातायाः । २० द्वे मांसपिंडविशेषस्य—(फुफ्फुस) । २१ द्वे मस्तकसंभूतघृताकारस्नेहस्य—(मगज) । २२ द्वे कर्णादिगतमलस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]अन्त्रं पुरीतद् [2]गुल्मस्तु प्लीहा पुंस्यथ [3]वस्नसा ।
[4]स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे ॥ ६६ ॥
[5]सृणिका स्यन्दिनी लाला [6]दूषिका नेत्रयोर्मलम् ।
(नासामलं तु [7]सिंघाणं [8]पिञ्जूषः कर्णयोर्मलम् ।)
[9]मूत्रं प्रस्राव [10]उच्चारावस्करौ शमलं शकृत् ॥ ६७ ॥
पुरीषं गूढवर्चस्कमस्त्री विष्ठाविषे स्त्रियौ ।
[11]स्यात्कर्परः कपालोऽस्त्री [12]कीकसं कुल्यमस्थि च ॥६८॥
स्याच्छरीरास्थिन [13]कङ्कालः पृष्ठास्थिन तु [14]कशेरुका ।
शिरोऽस्थिनि [15]करोटिः स्त्री पार्श्वास्थिनि तु [16]पर्शुका॥६९॥
[17]अङ्गं प्रतीकोऽवयवोऽपघनोऽथ [18]कलेवरम् ।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ ७० ॥
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ।
[19]पादाग्रं प्रपदं पादः [20]पदंघ्रिश्चरणोऽस्त्रियाम् ॥ ७१ ॥
तद्ग्रंथी [21]घुटिके गुल्फौ [22]पुमान्पार्ष्णिस्तयोरधः ।

---

१ द्वे अंत्रस्य–(अँतड़ी)। २ द्वे वामकुक्षिस्थमांसपिण्डविशेषस्य–(तिल्ली) ३ द्वे 'नसा' इति ख्यातायाः। ४ द्वे दक्षिणकुक्षिस्थमांसपिण्डस्य–(कलेजा)। ५ त्रीणि लालायाः। ६ एकं नेत्रमलस्य–(कीचर)। ७ एकं नासामलस्य—(नकटी)। ८ एकं कर्णमलस्य–(खूट)। ९ द्वे मूत्रस्य। १० नव विष्ठायाः। ११ द्वे शिरोऽस्थिपञ्जरस्य। १२ त्रीणि अस्थिमात्रस्य–(हड्डी)। १३ एकं शरीरगतास्थिपञ्जरस्य। १४ एकं पृष्ठमध्यगतास्थिदण्डस्य–(रीढ़)। १५ एकं शिरोगतास्थिसंघस्य। १६ एकं पार्श्वगतास्थिनि। १७ चत्वारि देहावयवस्य। १८ द्वादश देहस्य। १९ द्वे पादाग्रस्य। २० चत्वारि चरणस्य। २१ द्वयं गुल्फयोः। २२ एकं पार्ष्णिभागस्य।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]जंघा तु प्रसृता [2]जानूरुपर्वाष्ठीवदस्त्रियाम् ॥ ७२ ॥
[3]सक्थिः क्लीबे पुमानूरुस्तत्सन्धिः पुंसि [4]वङ्क्षणः ।
[5]गुदं त्वपानं पायुर्ना [6]बस्तिर्नाभेरधो द्वयोः ॥७३॥
[7]कटो ना श्रोणिफलकं [8]कटिः श्रोणिः ककुद्मती ।
[9]पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु [10]जघनं पुरः ॥७४॥
कूपकौ तु नितम्बस्थौ द्वयहीने [11]कुकुन्दरे ।
स्त्रियां [12]स्फिचौ [13]कटिप्रोथावुपस्थो वक्ष्यमाणयोः॥७५॥
[14]भगं योनिर्द्वयोः [15]शिश्नो मेढ्रो मेहनशेफसी ।
[16]मुष्कोऽण्डकोशो वृषणः पृष्ठवंशाधरे [17]त्रिकम् ॥७६॥
[18]पिचण्डकुक्षी जठरोदरतुन्दं [19]स्तनौ कुचौ ।
[20]चूचुकन्तु कुचाग्रं स्यान्न ना [21]क्रोडं भुजान्तरम् ॥७७॥
उरो वत्सं च वक्षश्च पृष्ठन्तु [22]चरमं तनोः ।

---

१ द्वे जंघायाः–(जांघ)। २ त्रयं जानूपरिभागस्य । ३ एकं सक्थ्नः। ४ एकं ऊरुसंधेः । ५ त्रीणि विष्ठानिर्गमनद्वारस्य (गुदा) । ६ एकं मूत्राशयस्य । ७ एकं श्रोणिफलकस्य । ८ त्रयं कटेः–(कमर) । ९ एकं स्त्रीकट्याः पश्चाद्भागस्य । १० एकं स्त्रीकट्याः पुरोभागस्य । ११ एकं पृष्ठवंशादधोमार्गस्थितगर्तयोः । १२ द्वे कटिस्थमांसपिण्डयोः । १३ एकं भगे शिश्ने च । १४ द्वे स्त्रीणामुपस्थस्य । १५ चत्वारि शिश्नस्य । १६ त्रीण्यण्डकोशस्य । १७ एकं पृष्ठवंशाधरभागस्य । १८ पञ्च जठरस्य–(पेट)। १९ द्वे वक्षोजस्य । २० द्वे स्तनाग्रस्य । २१ पञ्च वक्षसि । २२ एकं शरीरस्यचरमभागस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]स्कन्धो भुजशिरोंसोऽस्त्री सन्धी तस्यैव [2]जत्रुणी ॥७८॥
[3]बाहुमूले उभौ कक्षौ [4]पार्श्वमस्त्री तयोरधः ।
[5]मध्यमश्चावलग्नश्च मध्योऽस्त्री द्वौ परौ द्वयोः ॥७९॥
[6]भुजबाहू प्रवेष्टो दोः [7]स्यात्कफोणिस्तु कूर्परः ।
अस्योपरि [8]प्रगण्डः [9]स्यात्प्रकोष्ठस्तस्य चाप्यधः ॥८०॥
मणिबन्धादाकनिष्ठं करस्य [10]करभो बहिः ।
[11]पञ्चशाखः शयः पाणि[12]स्तर्जनी स्यात्प्रदेशिनी ॥८१॥
[13]अंगुल्यः करशाखाः स्युः [14]पुंस्यंगुष्ठः प्रदेशिनी ।
मध्यमाऽनामिका चापि कनिष्ठा चेति ताः क्रमात् ॥८२॥
[15]पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।
[16]प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥ ८३ ॥
[17]अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलः ।
पाणौ [18]चपेटप्रतलप्रहस्ता विस्तृतांगुलौ ॥ ८४ ॥
द्वौ [19]संहतौ सहतलप्रतलौ वामदक्षिणौ ।
पाणिर्निकुब्जः [20]प्रसृतिस्तौ युतावञ्जलिः पुमान् ॥८५॥

---

१ त्रीणि भुजाशिरसः—(कांध) । २ एकं स्कन्धसन्धेः । ३ द्वे कक्षस्य । ४ एकं कक्षयोरधोभागस्य । ५ त्रीणि तनुमध्यस्य—(कमर) । ६ चत्वारि भुजस्य । ७ द्वे कूर्परस्य । ८ एकं कूर्परस्योपरिभागस्य । ९ एकं कूर्परस्याधोभागस्य । १० एकं मणिबंधादारभ्य कनिष्ठापर्यन्तं मांसलबहिर्भागस्य । ११ त्रीणि करस्य । १२ द्वे अंगुष्ठसमीपाङ्गुल्याः । १३ द्वे अंगुलीमात्रस्य । १४ एकैकं क्रमेणांगुलीनाम् । १५ चत्वारि नखस्य । १६ एकैकं तर्जन्यादिभिस्तिसृभिरंगुलीभिर्युतेऽङ्गुष्ठविस्तृते । १७ द्वे वितस्तेः—(बालिश्त) । १८ त्रीणि विस्तृतांगुलिके पाणौ । १९ द्वयं संहततलस्य । २० एकमञ्जलेः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रकोष्ठे [1]विस्तृतकरे [2]हस्तो मुष्ट्या तु बद्धया ।
[3]सरत्निः [4]स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥८६॥
[5]व्यामो बाह्वोः सकरयोस्तस्ततयोस्तिर्यगन्तरम् ।
[6]ऊर्ध्वविस्तृतदोः पाणिर्नृमाने पौरुषं त्रिषु ॥ ८७ ॥
[7]कण्ठो गलोऽथ [8]ग्रीवायां शिरोधिः कन्धरेत्यपि ।
[9]कम्बुग्रीवा त्रिरेखा [10]साऽवटुर्घाटा कृकाटिका ॥८८॥
[11]वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।
क्लीबे [12]घ्राणं गन्धवहा घोणा नासा च नासिका ॥८९॥
[13]औष्ठाधरौ तु रदनच्छदौ दशनवाससी ।
[14]अधस्ताच्चिबुकं [15]गण्डौ कपोलौ तत्परा [16]हनुः ॥९०॥
[17]रदना दशना दन्ता [18]रदास्तालु तु काकुदम् ।
[19]रसज्ञा रसना जिह्वा प्रान्तावोष्ठस्य [20]सृक्कणी ॥९१॥

---

१ एकं द्वयोः प्रसृत्योः—(पसर) । २एकं चतुर्विंशदगुलपरिमितस्य । ३ एकं सरत्नेः । ४ एकमरत्नेः । ५ एकं तिर्यग्विस्तृतयोः करसहितयोर्बाह्वोरन्तरस्य । ६ एकं पुरुषमात्रप्रमाणस्य—(कूद) । ७ द्वे ग्रीवाग्रभागस्य—(गला) । ८ त्रीणि ग्रीवायाः । ९ एकं त्रिरेखायुतायाः—(गावदुम गर्दन) । १० त्रीणि ग्रीवाशिरःसंधेः पश्चाद्भागस्य 'घांटी' इत्याख्यातस्य । ११ सप्त मुखस्य । १२ पञ्च नासिकायाः । १३ चत्वारि ओष्ठस्य । १४ एकमधराधोभागस्य ('ठोड़ी' इत्याख्यातस्य) । १५ द्वे कपोलस्य—(गाल) । १६ एकं चिबुकस्याधोभागस्य । १७ चत्वारि दन्तस्य । १८ द्वे तालुनः । १९ त्रीणि जिह्वायाः (जीभ) । २० एकमोष्ठद्वयस्य वामदक्षिणभागस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां [2]भ्रुवौ स्त्रियो ।
[3]कूर्चमस्त्री भ्रुवोर्मध्यं [4]तारकाक्ष्णः कनीनिका ॥९२॥
[5]लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।
दृग्दृष्टी [6]चास्रु नेत्राम्बु रोदनश्चास्रमश्रु च ॥ ९३ ॥
[7]अपाङ्गौ नेत्रयोरन्तौ [8]कटाक्षोऽपाङ्गदर्शने ।
[9]कर्णशष्कुल्यग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥ ९४ ॥
[10]उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।
[11]चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः ॥ ९५ ॥
[12]तद्वृन्दे कैशिकं कैश्य[13]मलकाश्चूर्णकुन्तलाः ।
ते ललाटे [14]भ्रमरकाः [15]काकपक्षः शिखण्डकः ॥ ९६ ॥
[16]कबरी केशवेशोऽथ [17]धम्मिल्लः संयताः कचाः ।
[18]शिखा चूडा केशपाशौ [19]व्रतिनस्तु जटा सटा ॥९७॥
[20]वेणिः प्रवेणी [21]शीर्षण्यशिरस्यौ विशदे कचे ।

---

१ त्रीणि भालस्य (पेशानी) । २ एकं दृग्भ्यामूर्ध्वभागयोः । ३ एकं नासोपरिभ्रुवोर्मध्ये । ४ एकं अक्ष्णः कनीनिकामध्यगत-कृष्णमण्डलस्य–(कोया) । ५ अष्टौ नेत्रस्य । ६ पञ्च नेत्रोदकस्य–(आँसू) ७ एकं नेत्रयोःप्रान्भागयोः–(आँख की कोर) । ८ एकमपाङ्गदर्शनस्य–(कटाक्ष) । ९ षट् कर्णस्य । १० पञ्च शिरसः । ११ षट् केशस्य । १२ द्वे केशसमूहस्य । १३ द्वे कुटिलकेशानाम्–(घूँघरवाले बाल) । १४ एकं ललाटस्थालकानाम्–(काकुल) । १५ द्वे कुमारचूडायाः । १६ द्वे केशबन्धरचनायाः–(माँग) । १७ एकं बद्धकेशस्य–(जूड़ा) । १८ त्रीणि शिखायाः । १९ द्वे व्रतिनः शिखायाः । २० द्वे सर्पाकार-रचितकेशवेशस्य । २१ द्वे निर्मलकेशस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥९८॥
[2]तनूरुहं रोम लोम तद्वृद्धौ [3]श्मश्रु पुम्मुखे ।
[4]आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ॥९९॥
दशैते [5]त्रिष्वलङ्कर्ताऽलङ्करिष्णुश्च [6]मण्डितः ।
प्रसाधितोऽलङ्कृतश्च भूषितश्च परिष्कृतः ॥१००॥
[7]विभ्राड्भ्राजिष्णुरोचिष्णू [8]भूषा तु स्यादलंक्रिया ।
[9]अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् ॥१०१॥
मण्डनं चाथ [10]मुकुटं किरीटं पुन्नपुंसकम् ।
[11]चूडामणिः शिरोरत्नं [12]तरलो हारमध्यगः ॥ १०२ ॥
[13]बालपाश्या पारितथ्या [14]पत्त्रपाश्या ललाटिका ।
[15]कर्णिका तालपत्रं [16]स्यात्कुण्डलं कर्णवेष्टनम् ॥१०३॥
[17]ग्रैवेयकं कण्ठभूषा [18]लम्बनं स्याल्ललन्तिका ।

---

१ कचपर्यायात् परप्रयुक्ताः पाशादयस्त्रयः केशसमूहवाचिनः । २ त्रयं रोम्णः । ३ एकं 'दाढ़ी' इति ख्यातस्य । ४ पंच अलंकृतस्य शोभायाम् । ५ द्वे अलङ्कर्तरि–(सिंगारिया) । ६ अलंकारेण शोभायमानस्य पञ्च । ७ त्रीण्यतिशयेन शोभमानस्य । ८ द्वे भूषणक्रियायाः । ९ पञ्च अलङ्कारस्य 'गहना' इति ख्यातस्य । १० द्वे किरीटस्य । ११ द्वे शिरोरत्नस्य । १२ एकं हारमध्यगतनायकमणेः–(सुमेरनी) । १३ द्वे सीमन्तभूषणस्य । १४ द्वे ललाटभूषणस्य 'टीका' इत्याख्यातस्य । १५ द्वे ताटंकस्य 'तरकी' इत्याख्यातस्य । १६ द्वे कुण्डलस्य । १७ द्वे ग्रीवाभरणस्य 'कण्ठा' इत्याख्यातस्य । १८ द्वे आनाभिलंबितकण्ठिकायाम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri.

स्वर्णैः [1]प्रालम्बिकाऽथोरः [2]सूत्रिका मौक्तिकैः कृता॥ १०४॥
[3]हारो मुक्तावली [4]देवच्छन्दोऽसौ शतयष्टिकः ।
हारभेदा [5]यष्टिभेदाद्गुत्सगुत्सार्धगोस्तनाः ॥ १०५ ॥
[6]अर्धहारो माणवक एकावल्येकयष्टिका ।
सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥ १०६ ॥
[7]आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम् ।
[8]केयूरमङ्गदं तुल्ये [9]अङ्गुलीयकमूर्मिका ॥ १०७ ॥
[10]साक्षरांगुलिमुद्रा स्यात्कङ्कणं [11]करभूषणम् ।
स्त्रीकट्यां [12]मेखला काञ्ची सप्तकी रशना तथा ॥१०८॥
क्लीबे सारसनं चाथ पुंस्कट्यां [13]शृंखलं त्रिषु ।
[14]पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ॥ १०९ ॥
[15]हंसकः पादकटकः किङ्किणी [16]क्षुद्रघण्टिका ।
[17]त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु ॥ ११० ॥

---

१ एकं सुवर्णप्रालम्बिमालायां । २एकं मौक्तिकरचितललन्तिकायाः 'मोतीमाला' इत्याख्यातायाः । ३ द्वे मुक्ताहारस्य । ४ एकं शतयष्टिकहारस्य । ५ द्वाविंशत्यष्टिको गुच्छः, चतुर्विंशतियष्टिको गुच्छार्धः, चतुर्यष्टिको गोस्तनः । ६द्वादशयष्टिकोऽर्धहारः । विंशतियष्टिको माणवकः ।७चत्वारि प्रकोष्ठाभरणस्य(चूड़ा) । ८द्वे प्रगण्डभूषणस्य–(बाजूबन्द) । ९द्वे अङ्गुल्याभरणस्य—(अंगूठी) । १० एकं साक्षराङ्गुल्याभरणस्य–(मोहरजड़ी अंगूठी) । ११ द्वे करबन्धभूषणस्य ('कंकण' इत्याख्यातस्य) १२ पञ्च स्त्रीणां कटिभूषणस्य–('करधनी' इत्याख्यातस्य) । १३ एकं पुंस्कटीभूषणस्य–(पुरुष की करधनी) । १४ पट् नूपुरस्य–'पैजेब' इत्याख्यातस्य । १५ त्रीणि पादकटकं 'कड़ा' इत्याख्यातस्य । १६ द्वे क्षुद्रघंटिकायाः 'घुँघुरू' इत्याख्यातायाः। १७त्वक्फलादिनिर्मितवस्त्रस्यैकम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]वाल्कं क्षौमादि [2]फालं तु कार्पासं बादरं च तत् ।
[3]कौशेयं कृमिकोशोत्थं [4]राङ्कवं मृगरोमजम् ॥ १११ ॥
[5]अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरे ।
[6]तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ॥ ११२ ॥
[7]पत्रोर्णं धौतकौशेयं बहुमूल्यं [8]महाधनम् ।
[9]क्षौमं दुकूलं स्याद् द्वे [10]तु निवीतं प्रावृतं त्रिषु ॥११३॥
स्त्रियां बहुत्वे वस्त्रस्य [11]दशाः स्युर्वस्तयोर्द्वयोः ।
[12]दैर्घ्यमायाम आनाहः [13]परिणाहो विशालता ॥११४॥
[14]पटच्चरं जीर्णवस्त्रं समौ [15]नक्तककर्पटौ ।
[16]वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् ॥ ११५ ॥
[17]सुचेलकः पटोऽस्त्री ना [18]वराशिः स्थूलशाटकः ।
[19]निचोलः प्रच्छदपटः समौ [20]रल्लककम्बलौ ॥ ११६ ॥

---

१ एकं वृक्षछालनिर्मितवस्त्रस्य–(टसर) । २ त्रीणि कार्पासवस्त्रस्य–(सूती कपड़ा) । ३एकं कृमिकोशजातवस्त्रस्य–('रेशमी' इत्याख्यातस्य) । ४ एकं मृगरोमजस्य ('ऊनी' इत्याख्यातस्य) । ५ चत्वारि नूतनवस्त्रस्य । ६ एकं धौतवस्त्रस्य–(धुला कपड़ा) । ७ एकं धौतकौशेयस्य । ८ एकं बहुमूल्यवस्त्रस्य–(कीमती कपड़ा) । ९ द्वे पट्टवस्त्रस्य । १० द्वे प्रावृतवस्त्रस्य–(उत्तरन) । ११ द्वे वस्त्रस्य प्रांतयोः–(छोर) । १२ त्रयं वस्त्रदैर्घ्यस्य (लम्बान) । १३ द्वे विस्तारस्य । १४ द्वे जीर्णवस्त्रस्य–(पुराना कपड़ा)। १५ द्वे जीर्णवस्त्रखण्डस्य । १६ षट् वस्त्रस्य । १७ द्वे शोभनवस्त्रस्य । १८ द्वे स्थूलवस्त्रस्य–(मोटा कपड़ा) । १९ द्वे बाणाद्याच्छादनपटस्य । २० द्वे कम्बलस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]अन्तरीयोपसंव्यानपरिधानान्यथोंऽशुकें।
द्वौ [2]प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ॥ ११७ ॥
संव्यानमुत्तरीयं च [3]चोलः कूर्पासकोऽस्त्रियाम्।
[4]नीशारः स्यात्प्रावरणे हिमानिलनिवारणे ॥ ११८ ॥
[5]अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमस्त्रियाम्।
[6]स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥ ११९ ॥
अस्त्री [7]वितानमुल्लोचो [8]दूष्याद्यं वस्त्रवेश्मनि।
[9]प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा ॥ १२० ॥
[10]परिकर्माङ्गसंस्कारः [11]स्यान्मार्ष्टिर्मार्जना मृजा।
[12]उद्वर्तनोत्सादने द्वे समे [13]आप्लाव आप्लवः ॥ १२१ ॥
स्नानं [14]चर्चा तु चार्चिक्यं स्यासकोऽथ [15]प्रबोधनम्।
अनुबोधः [16]पत्रलेखा पत्राङ्गुलिरिमे समे ॥ १२२ ॥

---

१ चत्वारि परिहिते वाससि—('धोती' इत्याख्यातायाः)। २ पञ्च उत्तरीयस्य-('अंगोछा' इत्यस्य)। ३ द्वे चोलस्य-(चोगा)। ४ एकं 'रजाई' इति ख्यातस्य। ५ एकं 'लहंगा' इति ख्यातस्य। ६ एकं पादाग्रपर्यन्तवस्त्रस्य। ७ द्वे 'चँदवा' इति ख्यातस्य। ८ एकं वस्त्ररचितगृहस्य—(तम्बू)। ९ त्रीणि जवनिकायाः—(कनात = पर्दा)। १० द्वे कुंकुमादिना शरीरे कृतसंस्कारमात्रस्य। ११ त्रीणि प्रोक्षणादिना देहनिर्मलीकरणस्य। १२ द्वे पिष्टादिना शरीरमलापकरणस्य-(अबटन)। १३ त्रीणि स्नानस्य। १४ त्रीणि चन्दनादिना देहविलेपस्य। १५ द्वे गतगन्धस्य पुनर्गन्धव्यक्तीकरणे। १६ द्वे कपालादौ कस्तूर्यादिरचितपत्रावल्याः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]तमालपत्रतिलकचित्रकाणि विशेषकम् ।
द्वितीयं च तुरीयं च न स्त्रियामथ [2]कुङ्कुमम् ॥१२३॥
काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतने ।
रक्तसंकोचपिशुनं धीरं लोहितचन्दनम् ॥ १२४ ॥
[3]लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः ।
[4]लवंगं देवकुसुमं श्रीसंज्ञमथ [5]जायकम् ॥ १२५ ॥
कालीयकञ्च कालानुसार्यं चाथ समार्थकम् ।
वंशिकागरुराजार्हलोहं कृमिजजोङ्गकम् ॥ १२६ ॥
[6]कालागुर्वगुरु स्यात्तन्मंगल्या मल्लिगन्धि यत् ।
[7]यक्षधूपः सर्जरसो रालसर्वरसावपि ॥ १२७ ॥
बहुरूपोऽप्यथ [8]वृकधूपकृत्रिमधूपकौ ।
[9]तुरुष्कः पिण्डकः सिह्लो यावनोप्यथ पायसः ॥१२८॥
[10]श्रीवासो वृकधूपोऽपि श्रीवेष्टसरलद्रवौ ।

---

१ चत्वारि तिलकस्य । २ एकादश कुंकुमस्य-(केशर) । ३ षट्कं लाक्षायाः-('महावर' इत्यस्य) । ४ त्रीणि लवङ्गस्य-(लौंग) । ५ त्रीणि जायकाख्यगन्धद्रव्यस्य । ६ सप्तकं कृष्णअगरु इत्यस्य । ७ पञ्च धूपस्य । ८ अनेकपदार्थकृतधूपस्य । ९ चत्वारि सिंहलाख्यगन्धद्रव्यस्य-(लोहबान)। १० पंच सरलद्रवस्य-(गंधबिरोजा) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]मृगनाभिर्मृगमदः कस्तूरी चाथ [2]कोलकम् ॥१२९॥
कक्कोलकं कोशफलमथ [3]कर्पूरमस्त्रियाम् ।
घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमबालुका ॥ १३० ॥
[4]गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् ।
[5]तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् ॥ १३१ ॥
[6]तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं चाथ [7]जाती कोशजाती फले समे ॥१३२॥
[8]कर्पूरागरुकस्तूरी कक्कोलैर्यक्षकर्दमः ।
[9]गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम् ॥ १३३ ॥
[10]चूर्णानि वासयोगाः [11]स्युर्भावितं वासितं त्रिषु ।
[12]संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम् ॥१३४॥
[13]माल्यं मालास्रजौ मूर्ध्नि केशमध्ये तु [14]गर्भकः ।

---

१ नामत्रयं कस्तूर्याः । २ त्रीणि कंकोलस्य । ३ पञ्च कर्पूरस्य । ४ चत्वारि चन्दनस्य । ५ एते त्रयश्चन्दनभेदाः । ६ पञ्च रक्तचन्दनस्य । ७ द्वे जातीफलस्य—(जायफल) । ८ कर्पूरागुरुकस्तूरी कर्पूरं चन्दनं तथा । एकीकृतमिदं सर्वं यक्षकर्दम इष्यते । ९ चत्वारि गात्रानुलेपयोग्यस्य । १० द्वे पटवासादिचूर्णमात्रस्य । ११ द्वे गन्धद्रव्येण वासितस्य । १२ एकं गन्धमाल्यधूपादिभिः संस्कृतस्य । १३ त्रीणि मूर्ध्नि धृतायाः मालायाः । १४ एकं केशमध्ये धृतमालायाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]प्रभ्रष्टकं शिखालम्बि पुरोन्यस्तं [2]ललामकम् ॥ १३५ ॥
[3]प्रालम्बमृजुलम्बि [4]स्यात्कण्ठाद्वैकक्षिकं तु तत् ।
यत्तिर्यक् क्षिप्तमुरसि [5]शिखास्वापीडशेखरौ ॥ १३६ ॥
[6]रचना स्यात्परिस्पन्द [7]आभोगः परिपूर्णता ।
[8]उपधानन्तूपबर्हः [9]शय्यायां शयनीयवत् ॥ १३७ ॥
शयनं [10]मंचपर्यङ्कपल्यङ्काः खट्वया समाः ।
[11]गेन्दुकः कन्दुको [12]दीपप्रदीपः [13]पीठमासनम् ॥१३८॥
[14]समुद्गकः संपुटकः [15]प्रतिग्राहः पतद्ग्रहः ।
[16]प्रसाधनी कङ्कतिका [17]प्रिष्टातः पटवासकः ॥ १३९ ॥
[18]दर्पणे मुकुरादर्शौ [19]व्यजनं तालवृन्तकम् ॥ १४० ॥

इति मनुष्यवर्गः ॥ ६ ॥

---

१ एकं शिखायां लम्बमानमाल्यस्य । २ एकं ललाटपर्यन्तक्षिप्तमाल्यस्य । ३ एकं कण्ठादृजुलम्बिमाल्यस्य । ४ एकं तिर्यङ्माल्यस्य । ५ द्वे शिखास्थस्य माल्यस्य । ६ द्वे शिल्पादिरचनायाः । ७ द्वे सर्वोपचारपरिपूर्णतायाः । ८ द्वे उच्छीर्षस्य—(तकिया) । ९ त्रीणि शय्यायाः—(तूलकादयः) १० चत्वारि खट्वायाः । ११ द्वे कन्दुकस्य—(गेंद) । १२ द्वे दीपस्य । १३ द्वे आसनस्य । १४ द्वे संपुटस्य—(डब्बा) । १५ द्वे 'पीकदानी' इति ख्यातस्य । १६गजदन्तादिरचितकेशमार्जन्याः—(कंघी) ककहा । १७ द्वे 'बुक्का' इति ख्यातस्य । १८ त्रीणि दर्पणस्य (आइना) । १९ द्वे व्यजनस्य (पंखा = बेना) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुमुक्षु भवन वेद वेदांग विद्यालय
ग्रन्थालय
आगत क्रमांक ..... 893 .....
दिनांक .....

मुमुक्षु भवन वेद वेदाङ्ग पुस्तकालय
आगत क्रमांक ..... 0030 .....
दिनांक ..... 15/5/80 .....

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मध्यमा प्रथम खंड के विद्यार्थियों को

हर्षसम्वाद

पं० श्रीकमलाकान्त शास्त्री 'दीनबन्धु' की नवीन रचना—

सोत्तरा मध्यमा-प्रश्नावली

(प्रथम खंड)

आजकल की शैली के अनुसार यह आवश्यक है कि परीक्षा में प्रत्येक प्रश्नों का समुचित उत्तर दिया जाय। अध्ययन करते समय परीक्षा में पास होना ही प्रत्येक छात्र का दृष्टिकोण रहता है। यदि उन्हें उचित ढंग बतला दिया जाय तो परीक्षा में उत्तीर्ण होने में कोई सन्देह न रहे। इसी विचार से पं० कमलाकान्त शास्त्री से व्याकरण-मध्यमा प्रथमखंड के प्र के उत्तर बहुत ही सरल ढंग से लिखवा कर छपाये हैं, परीक्षार्थि के लिये यह बहुत बड़े काम की चीज़ है।

कमीशन काटकर

प्राप्तिस्थान—

पं० लक्ष्मीनारायण मि

लक्ष्मी-संस्कृत-पुस्तकालय,

चौड़ीगली, बनारस सिटी।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri